ॐ

श्रीतपोवनशतकम्

सानुवाद संस्कृत टीका समन्वितम् ।

ग्रन्थकारः-

पण्डित श्री बालकृष्ण भट्ट शास्त्री

टीकाकारः-

पण्डित श्री चण्डीप्रसाद बहुगुणः

ॐ

श्रीतपोवनशतकम्

सानुवाद संस्कृत टीका समन्वितम् ।

ग्रन्थकारः

विद्याभूषण, दर्शनकेसरि, ज्योतिष रत्न, कर्मकाण्डमणि,
कविरत्नादि नानाविरुद विभूषितः

पण्डित श्री बालकृष्ण भट्ट शास्त्री

साहित्याचार्यः, काव्य तीर्थः,
टिहरी राजकीय संस्कृत महाविद्यालय प्रधानाचार्यश्च ।

टीकाकारः


पण्डित श्री चण्डीप्रसाद बहुगुणः

व्याकरणाचार्यः, हिन्दी साहित्यरत्नम्,
तत्संस्कृतमहाविद्यालयाध्यापकः ।

प्रकाशकः

पण्डितप्रवरः श्री वल्लभराम शर्मा

वैद्यराजः, आयुर्वेदाचार्यः, वनस्पति शास्त्री



घोरां तपः क्लेशततिं विषह्य चिरं परिश्रम्य निजार्थ सिद्ध्यै ।
जातः कृतार्थो "हिमवद्विभूतिः" प्रख्यायते सर्व जनै र्महात्मा ॥

प्रास्ताविकं किञ्चित्

"श्री तपोवनशतक" नामकोऽयं ग्रन्थः केवलपद्यात्मकः पञ्च षट् संवत्सरेभ्यः प्राक् प्राकाश्य मनायि। इदानीन्तु स मूलग्रन्थो बहुविद्वदभिष्टुत टीकया हिन्दीभाषानुवाद समेतया सम्यक् परिमार्जितया समलङ्कृतः प्राकाश्यं नीयतेऽस्माभिः। सानुवाद व्याख्याकाराः श्रीमन्तः पण्डित चण्डीप्रसाद बहुगुणमहोदयाः शतशोऽथ सहस्रशो धन्यवाद मर्हन्ति समेषां विदुषा मविदुषाञ्च निर्विशेष मेतत्सस्नेहसमुद्यमेन। व्याकरणचार्योपाधि·मान् स्वय मयं व्याख्याता शब्दशास्त्र इव साहित्यविद्याया मपिनिष्णात इति टीकायां पदवाक्योपन्यास सौष्ठव मिवार्थ स्फुटीकरण पाटवमपि यद् दृश्यते, तदुल्बणतर मुद्घोषयति। भक्तिरसप्रधानेऽस्मिन् खण्डकाव्ये श्री स्वामिविषयिका रतिः स्थायिभावो यः कविवरेणैक कस्मिन् पद्ये ऽन्त र्निहितो ग्रन्थकारेण, स खलु टीकाकारेण संक्षिप्त सरलया पदप्रयोगविधया बहिरानीतो महता चातुर्येणेति स भावो नून मास्वाद्यते सर्वत्र ग्रन्थे सर्वै रनायासेन पाठकैः साधारणैरपीति महती कृतेय मुपकृतिः। अपि चैतादृशी सरल सुन्दरा संस्कृत टीका सुरसरस्वत्या मयत्नतोव्युत्पत्ति मभीप्सतां विद्यार्थि जनाना मपि प्रियङ्करी स्यादिति, तथा च देववाण्याः समुन्नत्यै महत्साहाय्य मादधातीति किमु विशेषतो वक्तव्यम्?

किञ्च,

"एतर्हि हा मूढजना अनेके
विधाय काषायिकसाधुवेषम्।
महात्मना मत्र भवादृशानां
सुनाम धामापि च दूषयन्ति॥"

इति यद् ग्रन्थकृता समुल्लिखित मथ व्याख्यानकृता च "गैरिकवस्त्रादि परमहंसनेपथ्यं विधाय कृत्वा, स्वशरीरं तादृशं सज्जीकृत्येति भावः" इत्यादिना हास्यरसद्योतिकथा शब्दभङ्ग्या यद् व्याख्यातं, तदेतत्पद्यस्याशयो विशिष्य विचारणीयो विचारशीलै र्जनैः। हन्त हन्त! देववन्द्यं दैवगुणामण्डितं शमप्रधानञ्च महोन्नतं

यतिजीवितं कीदृशीं कच्चरां नीचातिनीचां दशां प्रापदधुनेति तै स्वकीय मुरुतरं विषाद मत्र प्रदर्शयत स्तदधः पतितदशोद्धरणकाङ्क्षया यथार्थ साधुजन चरणाब्जचञ्चरीकौ विद्याविनयादि सात्त्विकोन्नतगुण संपन्नौ तावुभौ। तथापि यतयः शान्तिरूपाः केचन विरला विजयन्तेऽद्यापि पृथिव्या मस्या मन्वर्थनामानोऽध्यात्मनिष्ठा महात्मान एतच्छतकविषयी भूत श्रीमत्स्वामिचरण सदृक्षा इति तेनैवेमां वसुन्धरां धन्यां मन्यामहे वयम्।

अथचातिशयोक्ति रत्युक्ति रुपमोत्प्रेक्षा रूपक मित्येव माद योऽलङ्कारा येऽत्र पद्येषु प्रयुक्ता व्याख्याता अव्याख्याताश्च व्याख्याकारेण विस्तरभयात्, तानालोक्य परगुणतत्कीर्तनासहिष्णवो "महात्मानः" स्वं मुखं भ्रकुटीभङ्गेन शरीरं वेपथुना च विकृतं मा कुर्वन्तु, कविवरस्येमं मन्तुं क्षाम्यन्तु ते कृपया, अलङ्काराः काव्य धर्म इति ज्ञात्वा, तथा तदन्तर्गतं भावार्थञ्चावगच्छन्तु सम्यग कलुषितधिया विद्वत्साहाय्येन।

परञ्चान्ततः प्रातः स्मरणीय परमपूज्य श्री स्वामितपोवन यतीन्द्र चरणानुरक्तानां तथा जगदभिवन्द्य चिरन्तनामरवाग्देवी चरणानुरक्तानाञ्च प्रतिनिधित्व मास्थाय वयं हृदयेनामन्द मभिनन्दामहे पण्डित प्रवरौ पण्डितनिकर शिरोऽवतंसौ श्रीभट्ट बहुगुणौ टिहरी समाख्योत्तराखण्ड महामहित मण्डलस्य गौरवभूतौ श्री तपोवनशतक तट्टीका प्रणयन प्रयास सुमेधसौ तावेतौ। अथ चाशास्महे तत्तादृश प्रतिभाशालिनोः संस्कृतविद्यायामश्रान्तव्यवसाय रसिकयो रेतयो रुत्तरोत्तर मुन्नतोन्नते संस्कृतशिक्षाविभागीये पदे प्रतिष्ठापनेनाथ तद्विरचित संस्कृतग्रन्थ प्रकाशन प्रचारणादिना च तद्भाषापोषणविषये तौ सावधानमनसा सादरं प्रोत्साहयेयु स्तदधिकृता इति। शं भूयात्।

अहमदाबाद }
1-4-56 }

इति सुधीजन विधेयः
पं० वल्लभराम शर्मा, वैद्यराजः,

प्रस्तावना

अहो धन्या धन्याः खलु पण्डित तल्लजा इमे श्री बालकृष्ण भट्ट शास्त्रि महोदयाः, यैरित्थ मात्मनः कविकर्मचातुरी चरितार्थिता श्री स्वामिपादानां प्रातः स्मरणीयानां सभक्तिक गुणगणोपवर्णन प्रधानेनानेन काव्य प्रणयनेन । "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इति हि श्रुति शासनम् । तथा च ब्रह्मविद् ब्रह्मैवेति ब्रह्मवित्स्तुति रपि ब्रह्मस्तुति रेवेति किमु सिद्धमत्र साधनीयम् ? विश्वतः प्रथितमहानुभावा ब्रह्मज्ञकुलमूर्धन्या स्त इमे परमपूज्य श्री तपोवनस्वामिचरणाः स्वकीय कवन कर्मणो विषयतामापादिताः श्री भट्ट कविनेति, किमितः परमन्यदाकांद्यते तत्कवनकलाचातुरी चारिताथ्याॅय ? अथ नैतत्तिरोहितं सुधियां यदिह शान्तरस भक्तिरस पक्षपातिनः कविवरा अनुगृहीत शेमुषीकाः पुराकालेष्विवेदानी मपि लोके विरलतरा एव दृश्यन्त इति । प्रायशः शृङ्गारादिरस रसिका हि कवयः । अत एव पण्डित धौरेयेण महात्ममौलिना श्री भर्तृहरिणा सोपहासं साक्षप मुक्तं "स्तनौ मांसग्रन्थी कनककलशा वित्युपमितौ" इत्येवमादि बहु ।

किञ्च, हिमवन्मध्यगत श्रीकेदारखण्ड मण्डलान्तर्गत टिहरीगढ़ देशेऽधुना यद्यपि जनाः प्रचुरतयेतरापेक्षया शिक्षा शून्याः सदुन्नतस्वतन्त्र विचार सामर्थ्य रहिताः शोचनीया वर्तन्ते, तथापि तादृश समाजात् पङ्कात् पङ्कजमिवैतादृशाः केचन सदुदार शिक्षित शुद्धबुद्धि श्रद्धा वैभव संपन्ना यथार्थ पण्डिता अन्वर्थ भूसुरास्तत्र समुत्पद्यन्त इति तद्देशस्य महानयमक्षयो भाग्य सञ्चयावशेष इति विशेषत उल्लेखनीयमुत्पश्यामः ।

★ प्रथम संस्करणस्य

अथ च तुर्याश्रम जीवितं तपोमय मुपशमप्रधानं स्वकीयं पञ्चविंशत्यधिक हायनसुदीर्घमविकल मस्मिन्नुत्तराखण्डविभागे (उत्तरकाशी गंगोत्तरी गोमुखादिधामसु) श्री स्वामिना मतिगत मद्यावधीति, तथा च तादृशेन दैव संप्रचोदितेन तत्सन्निधानेन तज्जनपदः सुष्ठु शोभनतां पवित्रतामथ प्रख्याततां मितरश्रद्धेया-दरणीयताञ्च पूर्वाधिकामाटीकिष्टेति च सर्व सुप्रसिद्धोऽयनंशः। तथा च तद्देशवास्तव्यानां पर्वतीयजनानां, वनवासकाले परब्रह्म-मूर्तेः श्री रघुकुलतिलकस्य यथा दण्डकारण्यवासिनां, तथा बुद्धिपूर्वकमबुद्धिपूर्वक मिच्छयाऽनिच्छया वा श्री स्वामिना-माराध्य चरणानामेवं तत्र विहरतां साक्षात् संदर्शन संगमनादि सौभाग्यं संप्राप्तमथ संप्राप्यते चाद्यापि सर्वश्रेयो विधायक मिति च तेषां प्राक्कृत पुण्यपुञ्जावशेषस्य महानपरोऽसाधारणः परि-पाकः। तथाऽपि वस्तुनिरीक्षण क्षमा शिक्षिता सत्प्रेक्षा केषाञ्चि-दतिलघुसंख्याकानामेव विशिष्टानामिह प्रेक्ष्यत इति, को वा साधारण स्तत्रत्योजन इमं सुकृत परिपाकं तेषां तत्त्वतोऽवगच्छति? इष्टकावाहकानां हन्त सद्रत्न ज्ञान परीक्षण प्रशंसनादिषु कथं सामर्थ्यं मौत्सुक्यं वा संभवेत्? "Fools rush in where angels fear to tread on" इत्यस्या महदुक्ते रुदाहरणभूतानां मूर्खाणामश्रद्दधानानां—साक्षरा वा ते सन्तु निरक्षराः—बलीवर्दसहोदराणामथ "भिक्षुको भिक्षुकं दृष्ट्वा श्वानवद् घुर्घुरायते" इति न्यायेन दुःसहमीर्ष्यासूयाविद्वेषादिविष मुद्वमतां द्विजिह्वसहोदराणाञ्च जनानामपराधमेव लघुगुरुतया बतानुपदमनुतिष्ठतां तु महापुरुषाराधनाभिरुचिवार्ता न कदापि कुत्रापि श्रुतचरी। अहो एते श्रीभट्टशास्त्रिमहाशयास्तु शास्त्र-निष्णाताः सूक्ष्मसुसंस्कृतसदुत्तमप्रेक्षाशालिनः साधुजनविधेयाः श्रद्धया श्रीस्वामिपादान् सौम्य काश्यां मुखतोऽवलोक्य तत्संगति

सौभाग्यसौख्यमास्वाद्यावगत्य च तन्महिमगौरव मतुलितं तत्प्रयुक्तमुपकृतिबाहुल्यञ्च, स्वस्य स्वोत्तराखण्डदेशीयानाञ्च स्वामिविषयकश्रद्धाभक्तिकृतज्ञतादिकान् भद्रभावाननेन सरससुन्दरस्तवनशतकोपहारेण प्राचकाशन्निति महत्साधु कृतमुत्तराखण्ड जनपदप्रतिष्ठितश्रेष्ठपण्डितपदानुरूपं तैः। विद्याविनयादिसुगुणनिधानस्य शास्त्रव्यवसायिनः कवनकलाकोविदस्य विविधविषयकबहुनिबन्ध निर्मातुः (टिहरीगढदेशीयस्यैतादृशस्य ग्रन्थकारस्या परस्य कस्यचिन्नाम न श्रुतिपथमागतम्) पण्डितमण्डलाखण्डलस्योत्तराखण्डमण्डलमण्डनायमानस्य सर्वं विजयमुत्तरोत्तरमाशास्महे वयम्।

अपि च विश्ववन्द्या स्त इमे श्रीस्वामिचरणाः सर्वत्र भारते वर्षे सुविदितशुभनामधेया इति न केवलं, किन्तु तदीयेश्वरदर्शनादिसन्निबन्धै स्तत्साधुचरितमपि विशेषतः सुष्ठु संप्रचरितमाचकास्तीति, न तेषां तदलौकिकचरितानां वाऽत्र परिचयाधानमपेक्ष्यते किञ्चिदपीति संप्रति मया विरम्यते।

इति
भवतां विधेयो
वी० आर० शर्मा
आयुर्वेदाचार्यः

अहमदाबाद
२०-११-५०

PRELUDE

To know a Mahatma—not in a jai-jai-bleating herd-enthusiasm, but by a personal direct realisation of his divine qualities—one must be a Mahatma as well. Inner purity, earned while burnishing the inborn higher Samskaras with study and satsang, reveals in itself a faculty powerful enough to X-ray through and percieve the subtle perfections in a God-man. Being such a cultured Sadhak, the poet has succeeded in discovering the divinity in His Holiness, and has, in these verses, successfully painted Shree Swami Tapovanji Maharaj in all his true Divine stature. Throughout the length of this adoration-song are bright strong brush-works which give the reader a vivid picture of this living Veda.

Himself a reputed Sanskrit Scholar of Uttarakhand and the Principal (Head Pandit) of the Sanskrit College Tehri, Pt. Balakrishna Bhatta Sastri has employed the best of his literary excellences in this soulfull *stava* of Shree Swami Ji. "स्तुत्यं विधेयम्"—"One praised is followed" —is an important Doctrine of the Mimamsakas. Hence this *sataka* is a true loka-sewa, as it interprets to a world based upon acquisition and publicity the greatness of a life in Godliness rooted in extreme renunciation and absolute silence. Such true interpretation of personalities living the enduring values of philosophic serenity and inner joy, will serve as golden edicts advising and instructing all men to follow and practise a similar perfect life......lived here among us in our day to day life.

No doubt, this gifted Pandit of the Himalayas, the author of many books, is to be congratulated for his success as a Sanskrit Poet, for his respect and admiration towards all Saints and Sages in general, and for his rare depth of love and devotion for the great Sage of Uttarkashi in particular. No doubt, all devotees of our Ancient Wisdom and aspirants to the Divine Path must feel indebted to him for this revealing and melodious *Sataka*.

Gangotri **"Chinmaya"**
1-viii-50. *Disciple.*

SRI SWAMI TAPOVANAM

He is a rare spiritual flower of the Himalayas wafting sweet Advaitic fragrance and the pleasant aroma of Vedanta and Bhakti from the snowy heights of Uttarkashi and Gangotri.

He is really a veritable living embodiment of the ideal sannyasa with all the supreme renunciation, rare saintliness, austerity, deep wisdom and divine dignity and compassion that is implied by such an ideal. He is an ornament to the Fourth Ashrama. Sannyasa was ingrained in Swami Tapovanamji from his very birth. He commenced his life with complete indifference towards wordly wealth and position. To this born-monk Adhyatmic wealth alone was the real wealth.

Few can compare favourably with the Sakyamuni in their intensity of Vairagya, an extreme aversion to worldly objects, an abiding disgust for the pleasures which form, so to say, the very life-breath of a worldling, and an all-consuming thirst for Truth. This part of the Budha's life strikes awe into the very bones of one who "witnesses" it through the medium of cold print. No less impressed were the fellow-sadhus and the hundreds of house-holders who passed by his Kutir (at Rishikesh) to see this Prince of learning put himself through a course of Tapascharya. He proved only too true to his own name. His life during this period was so full of strenuous practices which breathe new life and vigour into the soul, as a Himalayan forest is of life-giving plants.

True to the classic tradition of rigid sannyasa, Swamiji has betaken himself to the forest fastness of the upper

Himalayas and for many years past he has taken his abode in sacred Uttarkashi. He seeks at times the deeper solitudes of the higher regions of icy Gangotri and Gomukhi. To him the Himalayas are the native home and seclusion amidst its towering peaks is his very life-breath as it were. He likes immensely the towering range, the dense deep seclusion of the Himalayan mountain peaks and its forests. He feels inspired by its sublime scenery and highly elevated by the serene peace of the Himalayan atmosphere.

He is a great Anubhava-gyani and is established in the consciousness of the supreme self. His life and personality are indeed most precious and invaluable, for they form a lofty example of what true Vedanta and true sannyasa have to be. He is an admirable combination of highest Vedanta-Anubhava in the strictest observance of the laws of Nivritti and the Sannyasa Dharma. Therefore his towering personality is an eye-opener and an exemplary guide and light to all seekers and sannyasins.

Of countless sannayasi-mahatmas dwelling in those regions, Swami Tapovanji is the crest-jem. What the Dhruva Nakshatra is to the stellar constellation, Swami Tapovanamji is among the Mahatmas in those upper Himalayan regions. Uttarkashi received its lustre from his presence there. He imports an added grandeur and holiness to that holy place. Its name has become synonymous with his. To the vast majority, Uttarkashi means Sri Swami Tapovanamji.

The Mahatmas there sit at his feet and drink the highest knowledge of the Vedanta that rains from his lips. They crowd before his Kutir and vie with one another for a close seat besides him during the informal Upadeshas.

They all thirst for his sat-sanga. No person passes through Uttarkashi without having the Darshan of and paying his homage to Sri Swami Tapovanamji. Even the highest of officials, the most learned of scholars sit at his lotus feet to learn Vedanta.

Upon rare occasions when he graces Rishikesh with his presence, he stops at a Parna Kuti built upon a little hillock over-looking the Ganges in the Tehri-Garhwal State. Here too visitors and Mahatmas crowd to have his Darshan and to listen to his words of wisdom. They pay homage to him in worshipful attitude full of reverence.

Though long past the stage of youth, he has trained himself to a hard life. He seldom wears foot-wear. The rough rocky ground and the mountainous tracts he traverses without hesitation every Year. During summer he leaves Uttarkashi and walks to Gangotri on foot. The morning bath of the icy cold Ganges, this sage would never miss even a day throughout the year. Long evening walk in the Himalayan solitudes is a favourite item in his routine. He has marvellous self-reliance, Titiksha and he is a sannyasi every inch in him. It is an inspiring and purifying sight to see this great sage in his flowing ochre-coloured robes, staff and Kamandal in hand, bare-headed and bare-footed with Brahmic radiance shining upon his countenance.

Swami Tapovanam is indeed a Vedantic Lion, a Vedanta Kesari, dwelling in majesty in his own regions of the great Himalayan range, whose very atmosphere is permeated with the spirit of Vedantic realization attained by past sages.

—*from the introduction to*

"Ishwara-Darshan,"

श्री तपोवनशतक विषयिकाः सम्मतयः

Swami Tapovanji was born near Palghat and had his early education in English. He studied Sahitya Sastra and then mastered the Vedanta Sastra. From his early years, he was completely indifferent to wordly wealth and position and exhibited an all-consuming thirst for Truth. He became a yogi and a sanyasin and made the heights of the Himalayas his abode. He lives at Uttarkasi. He is a writer of simple sanskrit poetry and prose and his Sanskrit auto-biography entitled Iswara Darsana has already been published.

The Century of verses composed by Sri Balkrishna Bhatta Sastri of the Tehri Sanskrit College celebrates the high excellences which go to make up the sanctified personality of the Swami. The metres employed are for the most part, Upajati, Vasanta Tilaka, and Malini. The Sanskrit is grammatical, the style is simple, the ideas are elevating and the sentiments come direct from the heart.

—Hindu, Madras.

महानुभावान् महापुरुषान् विषयीकृत्य काव्यनिर्माणं प्राचीन कालादारभ्य भारते वर्षे प्रचलितं दृश्यते। श्रीतपोवनस्वामिपूज्य-पादान् लक्ष्यीकृत्य विरचितमिदं "श्रीतपोवनशतक" नामकं संस्कृत काव्यं तस्मिन् महात्मनि भक्ति बहुमानातिशय मुत्पादयतीति न केवलं, किन्तु गैर्वाणी साहित्यस्यापि माहात्म्य मनितरसाधारणं पुष्णाति च। भक्तिरसप्रधान मिदं खण्डकाव्यं भारतीयेभ्यः सस्नेहं समर्पयन्तं संस्कृतपण्डित मूर्धन्यं संस्कृत हृदयं पण्डित श्रीबालकृष्ण भट्ट शास्त्रिण मत्र बहुशोऽभिनन्दामहे वयम्।

"ग्रावोच्चयोपचित पर्वत मस्तके वा
गङ्गातरङ्ग हिमसंकुल गोमुखे वा।
व्याघ्रादि हिंसक समाकुल कानने वा
योगी तपत्य विरतं खलु सोऽद्वितीयम् ॥"

इत्येतादृश्या सुगमसुललितरीत्या वर्णितमिदं शतकं सर्वान् सुरसरस्वतीविदः पुलकाञ्चितशरीरान् विधातु मलं विशोभते। "श्रीतपोवनचरित" संज्ञकं सुरभाषामयं श्री तपोवन स्वामिनां विपुलं जीवनवृत्तग्रन्थमनधीयाना भारते विरला एवेति च विश्व-सिति ग्रन्थकारः।एतादृशं सदुद्यमं पुनः पुन रुपश्लोकामहे वयमिति।

प्रबुद्धकेरलम्—कालटि (श्रीशङ्कराचार्यजन्मस्थानम्)
Travancore.

Dr. Radha Kumud Mookerji, M.A., P.H.D.

Hon'y. Editor, "Himalaya"

(Journal of the Badrinath Temple Committee)

Dear Balkrishna Bhatta Sastri,

I am gratful to you for your kind gift of the two works, "Sri Tapovana Satakam", and "Kanaka Vamsah" which are very inspiring and instructive reading. I hope it may be given to me in my chathurthashrama to have a darshan of Sri Tapovanam at Rishikesh.

I have been here as a member of Parliament.

Wishing you all success in your noble mission to popularise sanskrit learning and culture.

9 North Avenue
New Delhi
28. 9. 53.

Yours sincerely
(Sd) R. K. Mookerji
(Member of Parliament)

प्रिय श्रीमन् !

आपकी सुन्दरकृति "श्रीतपोवनशतकम्" की एक प्रति प्राप्त कर प्रसन्नता हुई। पुस्तक रचना बहुत सुन्दर तथा सर्वगुण संपन्न है। अतः एतदर्थ हार्दिक धन्यवाद।

भवदीय—

विश्वबन्धु, शास्त्री, एम. ए.
अध्यक्ष, विश्वेश्वरानन्द वैदिक शोधसंस्थान,
पंजाब।

आचार्य महाभागाः

नमो वः।

"श्रीतपोवनशतकम्" सम्प्राप्तम्। शतक मिदं सरलं सुगमं काव्य गुणोपेतं मनोमोहकञ्च वर्तते। अत स्तदर्थं हृदयान्तस्तलोद्गान् भूरिशो धन्यवादान् प्रेषयामः। श्रीमतां कश्चित

नरदेवशास्त्री, वेदतीर्थः, (एम. एल. ए.)
द्रोणनगरम्।

श्रीपूज्यआचार्यवर्याः

सादरं प्रणतयः।

श्रीमद्भिः प्रेषितं "श्री तपोवनशतकं" संप्राप्य पठितञ्च साद्योपान्तम्। पुस्तकमिदमस्ति श्रीमदन्य पुस्तक सदृशमत्युत्तमं, प्रसादगुणोपेतं, वैदर्भीरीति विभूषितं, शब्दार्थालङ्कारैरलंकृतञ्च। अत्र गङ्गोत्तरीक्षेत्रनिवासिन स्तपस्विनो यतेः संक्षिप्त जीवनपरिचयादिकं श्रीमद्भिः सम्यग् वर्णितम्। एतादृशैरेव विद्वद्भि र्देशस्य गौरवं वर्धते, समाजस्य सेवा साहित्यस्य चोन्नतिः सम्पद्यते। किं बहुना, शतकस्यात्र आयुर्वेदाचार्ये श्री वि. आर. शर्म महोदय लिखिता प्रस्तावनाऽपि पठनीया मननीया चास्ति। कीदृशं सुन्दरं लेख्य-लेखकयोः परिचयादिवर्णनं कृतं तै स्तत्रेति शम्।

भवतां विधेयः

सुरेन्द्रदत्त पैन्यूली, आयुर्वेदाचार्यः,
चन्द्रापुरी (गढ़वाल)

ॐ

तपोऽरण्याख्यानां यमनियम मुख्याङ्गपटली-
जटालानामेत च्चरित शतकं यैर्विरचितम् ।
अदुष्टै रक्लिष्टै गुरुभिरभिरामैः पदचयैः
प्रणामः शास्त्रिभ्यः सुकवितिलकेभ्ये भवतुमे ॥
हिमगिरिपरिनिष्ठेत्यादि पद्याशयो यो
विलसति स तु विद्वन्मानसे हंसतीह ।
उदयति विततोर्ध्वेत्यादि पद्याशयोद्यद्-
बिरुदविदित घण्टामाघमत्येति नूनम् ॥
श्री बालकृष्ण शास्त्रिप्रवरहिमाद्रे रनर्गलं गलिता ।
कवितागङ्गा कस्य न संसारजताप मपहरति ॥
साहित्य दर्पणाभिख्य प्रबन्धपरिशीलने ।
पुरा परिचितो बाल्ये शुभनामा महामतिः ॥
एवं महायतिरयं भवितेति पूर्व-
मेवान्वमानि बहि रुद्गत तत्त्व वाक्यात् ।
सत्यं तदेव समभूदनुमानजन्य-
ज्ञानं प्रमाणमिति यत्कथितं मुनीद्रैः ॥
बाल गोपाललक्ष्यं मे कृतार्थमभवन्मनः ।
यत्स्वामिवर्णन ग्रन्थदर्शनाद् ग्रन्थिनिर्गमः ॥

कुत्तनूर, मलबार
8-1-52

इति भवद्विधेयः
के. पि. नारायणनायकः



पं० श्री बालकृष्ण भट्ट शास्त्री

ॐ

श्री तपोवनशतकम्

सानुवाद संस्कृत टीका समन्वितम्

प्रणौमि वाचं जगदादिहेतुं
यतीन्द्र मुख्यांश्च दयार्द्र भावान् ।
येषां प्रसादेन तपोबलेन
चराचरं सर्व मिदं चकास्ति ॥ १ ॥

अथ श्रीपरमयोगशक्तिचणस्य स्वनामधन्यस्य परमपूज्य श्रीस्वामि तपोवनमहाभागस्य महात्मनो योगसिद्धस्याप्रमित योग शक्ति प्रभावितेन श्रीकविवर कविरत्न पण्डित बालकृष्ण भट्ट साहित्याचार्य महोदयेनोत्तराखण्डाखण्ड पण्डितमण्डलाखण्डलेन विरचितं शब्दार्थभासुरं मनोहारि श्रीतपोवनशतक मधीत्य तस्मिन् समेषां गतिसौकर्याय स्वान्तः सुखाय च सानुवादां टीका मल्पग्रन्थां निबध्नामि ।

रौद्रीदत्तिः पदाचार्य श्चण्डीप्रसादनामकः ।
हिन्दी साहित्यरत्नं यः टिहरीगढदेशजः ॥
ध्यायं ध्यायं शिवं साम्बं श्रीकृष्णं परमं गुरुम् ।
तपोवनशतश्लोकान् विवृणोमि यथामति ॥

ग्रन्थादौ मङ्गल माचरेदिति शास्त्रविदां वचनं शिष्टाचारानु गृहीत मनुस्मरन् ग्रन्थादौ तावदत्र मङ्गलमाचरति ग्रन्थकारः कविः— प्रणौमि वाचमिति—

जगतः संसारस्य आदिहेतुं प्रथमकारणभूतां वाचं सरस्वतीमोङ्कारस्वरूपिणीं, दयया कारुण्येन आर्द्रभावः सरसहृदयं येषान्तान् यतीन्द्रेषु योगिवर्येषु मुख्या अग्रेसरा स्तानपि पुरातनानधुनातनांश्च प्रणौमि, णु स्तुतौ, प्रकर्षेण पौनः पुन्येन नौमि स्तौमि । येषां योगशीलानां प्रसादेनानुग्रहेण तपोबलेन तपश्चर्यया च इदं सर्वं निखिलं चराचरं विश्वं चकास्ति एतद्रूपेण शोभते । योगिनां योग जनितागण्यपुण्यप्रभावः समस्तं जगदतिवेल मवष्टभ्य परिरक्षतीत्यर्थः ॥ १ ॥

हिन्दी—संसार की उत्पादयित्री भगवती ओङ्कारस्वरूपिणी सरस्वती देवी को, एवं शरण्य रक्षक सदयहृदयी सनक सनन्दन आदि श्रेष्ठ पुरातन आधुनिक सब योगिजनों को भी वारंवार स्तुति करते हैं, जिनके अनुग्रह से और तपोबल के प्रभाव से ही यह समस्त विश्व इस रूप से प्रकाशित हो रहा है। योगियों के योगजनित अगण्य पुण्य प्रभाव संपूर्ण जगत को सदा अवष्टंभन करके रक्षा करते हैं, यह भाव है ॥ १ ॥

स्वतेजसा येन विरागमूर्तिना
तिरस्कृता भौतिकभूति संहतिः ।
कृता तथाऽध्यात्म समुन्नतिर्मह—
त्यहो स कोऽपीह तपोवनं यतिः ॥ २ ॥

अथ श्री तपोवनयतीन्द्राणां गुणगणान् वर्णयितु मुपक्रमते कवीन्द्रः—स्वतेजसा इत्यादिना—

विरागो विरक्ति मूर्तिः स्वरूपं यस्य तेन विरागमूर्तिना येन स्वतेजसा स्वकीयतपोबलेन भौतिकी चासौ भूतिर्लौकिकैश्वर्यं तस्याः संहतिः समुदायः तिरस्कृता अभिभूता, तथा महती महनीया अध्यात्म मात्मसंबन्धिनी समुन्नतिर्वृद्धिः कृता विहिता; अहो आश्चर्यम् इह अस्मिन् हिमालये स एवंभूतः कोऽपि कश्चित् तपोवनं तन्नामाभिधेयो यतिर्वसतीति शेषः ॥ २ ॥

वैराग्य की मूर्ति जिसने अपने तपोबल के प्रभाव से समस्त लौकिक भोगों को त्याग दिया है और साथ ही आत्मविषयक ज्ञान की पूर्णतः प्राप्ति कर दी है, इस प्रकार के कोई यति तपोवन नाम से प्रसिद्ध इस हिमालय में निवास करते हैं ॥ २ ॥

यस्य प्रसङ्गलवमेत्य भृशं कृतार्थाः
के वा बभूवुरिह नो विगतात्मशङ्काः ।
तस्य प्रसिद्धविदुषोऽथ महायतेश्च
को वा गुणान् जगति वर्णयितुं समर्थः ॥ ३ ॥

इह अस्मिन् लोके इदानीं यस्य योगिनः प्रसङ्गस्य लवंलेश मात्र मेत्य प्राप्य भृश मत्यन्तं कृतार्थाः सफलमनोरथाः, विगता दूरीभूता आत्मशङ्का आत्मसन्देहा येषान्ते, के वा नो बभूवु रपितु सर्वे बभूवुर्जाताः । तस्य तादृशस्य प्रसिद्धश्चासौविद्वान् तस्य प्रसिद्ध विदुषः, महायतेर्विशिष्ट संन्यासिनः, गुणान् सच्चरित्राणि वर्णयितुं कथयितुं जगति भुवने कः समर्थो योग्योऽस्ति ॥ ३ ॥

इस वक्त यहां सभी लोग श्री स्वामी तपोवन यति के सत्सङ्ग तथा उपदेश को प्राप्त करके पूर्ण मनोरथ और आतमा के विषय में होने वाली शङ्काओं से रहित हैं, अर्थात् सब को इनके समागम से महान् लाभ हुआ है, ऐसे प्रसिद्ध विद्वान् इस महायोगी के सच्चरित्रों का वर्णन संसार में कौन कर सकता है ॥ ३ ॥

यः स्वान्तिकं गतवतः सुजना नमन्द-
मानन्द सान्द्रहृदयां स्तनुते मुनीन्द्रः ।
अल्पस्मितैः सुमधुरैर्निजवाग्विलासै-
र्वेदान्ततत्त्वगमकै रुपदेशरूपैः ॥ ४ ॥

यो मुनीन्द्रो विज्ञवरः अल्पस्मितै रीषद्धास्यान्वितैः, सुमधुरै र्मनोहरैः, वेदान्ततत्त्वस्य उपनिषद्रहस्यस्य गमकैर्बोधकैरुपदेशरूपैः, निजवाग्विलासैः स्वकीयैर्वाङ्मयैः, स्वान्तिकं स्वोपकण्ठं गतवतः प्राप्तान्, सुजनान् अधिकारिणो जनान्, अमन्दमत्यन्त मानन्देन हर्षेण सान्द्राणि घनीभूतानि हृदयानि चेतांसियेषां तान् तनुते करोति ॥ ४ ॥

ज्ञानियों में श्रेष्ठ श्रीस्वामी जी महाराज अपने कुछ हँस मुख और वेदान्त शास्त्र के सार से गर्भित सुमधुर उपदेशवचनों के द्वारा अपने पास आये हुए भक्त जनों को आनन्द सागर में सरावोर कर देते हैं। भाव यह है कि वे लोग ईश्वरीय ज्ञान की प्राप्ति से अत्यधिक सन्तुष्ट हो जाते हैं ॥ ४ ॥

निर्व्याज भक्तिरस भावित विश्वनाथ-
माबिभ्रतः श्रुतिसनातन योगमार्गम् ।

यस्य प्रपूज्यसुयतेस्तु तपोवनस्य
निष्कल्मषाणि चरितानि जगत् पुनन्ति ॥ ५ ॥

निर्व्याजा निश्छला या भक्तिः तस्या रसेन भावितो नित्य-निरन्तरतयाऽनुभूतो विश्वनाथः काशीपतिर्येन सः, तं श्रुत्या वेदार्थाद्गतः सनातनो नित्यो योगमार्गो ब्रह्मज्ञानयोगपथ स्तंमाबिभ्रत आसमन्ताद्भजमानस्य, यस्य प्रपूज्यस्य प्रकर्षेण अतिशयेन पूजनीयस्य पुष्पादिभिरर्चनीयस्य । "देवद्विजगुरुप्राज्ञपूजन" मिति भगवता प्राज्ञानां विदुषां पूजनस्य तपोरूपेण विहितत्वाद् ब्रह्मविदो ब्रह्मरूपा अतिशये पूजनीया इत्यर्थः । सुयतेः संन्यासिवरस्य तपोवनस्यतु कल्मषेभ्यो निर्गतानि निष्कल्मषाणि चरितानि दिव्याचरणानि जगत् पुनन्ति विश्वं समस्तं पवित्रो कुर्वन्ति । श्लोकद्वयगत यच्छब्दयो रग्रिमश्लोकगत तच्छब्देन संम्बन्धः ॥ ५ ॥

जिसने निष्कामना से श्री विश्वनाथ जी की सर्वोच्च भक्ति की है, और ज्ञान निष्ठा भी प्राप्त की है, एवं जो इस कलिकाल में भी परम्परा से प्राप्त इस भक्ति ज्ञानमय योगमार्ग को सम्यक् धारण कर रहे हैं, ऐसे अत्यन्त पूजनीय महान् संन्यासी श्री तपोवन महाराज के उदात्त चरित्र ही संपूर्ण जगत को पवित्र कर रहे हैं। क्योंकि योगियों के योग की शक्ति और दिव्याचरण के समान जगत को पवित्र करने वाली अन्य कोई वस्तु नहीं है। "देवता, ब्राह्मण, गुरु और विद्वान् इनका पूजन तपस्या मानकर करना चाहिये" इस गीता वचन के प्रामाण्य से साक्षात् ब्रह्मरूप ब्रह्मवित पुष्पादियों से अतिशयेन अर्चनीय होते हैं, प्रपूज्य शब्द का यह भावार्थ है ॥ ५ ॥

यः सौम्यकाश्यां प्रभुसम्मुखस्थो
ह्यसन्मुखो देवगिरोद्गिरंश्च ।

स योगिराट् स्वामितपोवनाख्यो
दृष्टः सदा राजतु मानसे मे ॥ ६ ॥

यः सौम्यकाश्या मुत्तरकाश्यां प्रभुसम्मुखस्थः श्रीविश्वनाथस्य सविधे संस्थितः, हसत् मुखमाननं यस्य हसन्मुखः प्रफुल्लाननः, देवगिरा संस्कृतवाण्या उद्गिरन् वदंश्च मया दृष्ट आसीत्। स योगिराट् तत्तादृशो यतिसार्वभौमः स्वामि तपोवनाख्यः सदा सर्वदा मे मम मानसे चित्ते राजतु विलसतु ॥ ६ ॥

इस श्लोक में कविवर ने स्वामीजी के प्रथम दर्शन का वर्णन किया है। उत्तरकाशी में श्री विश्वनाथ मन्दिर के समीप अपनी कुटिया में बैठे हुए, और संस्कृत वाणी से बोलते हुए, स्वामी जी को मैंने देखा। स्वामी तपोवन नाम से सर्वत्र प्रख्यात ऐसे विशिष्ट यतिवर मेरे चित्त में सदा निवास करें। इससे ज्ञात होता है कि ग्रन्थ कर्ता भी योग शील व्यक्ति हैं। गुणी ही गुणी के गुणों का अनुमान या प्रत्यक्ष कर सकता है ॥ ६ ॥

मन्ये यतिन् योगपथप्रदीपः
प्रभञ्जनोऽज्ञान महीरुहाणाम् ।
दावानलो दोष सरीसृपाणां
लोकोत्तरस्त्वं हिमवद्विभूतिः ॥ ७ ॥

हे यतिन् ! योगपथस्य योगमार्गस्य प्रदीपो दीपकः, अज्ञान रूपा अविद्यारूपा महीरुहा वृक्षा स्तेषां प्रभञ्जनो वायुरिव विध्वंसकः, दोषाः चित्तदोषा रागद्वेषा दय एव सरीसृपाः सर्पा स्तेषां दावानलो विनाशकः वनाग्नि रिति च मन्ये त्वामहं जाने। अतएव त्वं

भवान् लोकोत्तरो दिव्यः, हिमवतो हिमालयस्य विभूतिर्भूतिरसि ॥ ७ ॥

हे महान् यति ! आप योगके प्रकाशक हो, अर्थात् योग प्रार्थी व्यक्तियों को योग की परम काष्ठा तक पहुँचाने में समर्थ हो और आप अज्ञान रूपी वृक्षों को ध्वंस करने में वायु रूप हो, तथा राग, द्वेष आदि चित्तके दोष रूपी सर्पों के नाश के लिये वन की अग्नि रूप हो, इस प्रकार मैं आपको मानता हूँ। इस कारण ही निश्चय आप हिमाचल की साक्षात् दिव्यविभूति हो ॥ ७ ॥

यद्योगशैल भव कीर्ति तरङ्गिणीयं
संसार सिन्धु मनुभात्यभितो विशन्ती ।
यत्रावगाह्य कतिचित् कृतिनः सलीलं
निर्वाणताधिगतये कुशलीभवन्ति ॥ ८ ॥

इयमेषा यस्य योगशैल भवा योगरूपपर्वतात् जातानिर्गता कीर्तितरङ्गिणी कीर्तिर्यशः सैव तरङ्गिणी नदी, संसार सिन्धुं संसारार्णव मभितः सर्वतो विशन्ती प्रविशन्ती व्याप्नुवन्तीत्यर्थः, अनुभाति अतितरां शोभते। यत्र यस्यां कतिचित् केचित् कृतिनः सुकृतिनो जनाः सलीलं लीलया अवगाह्य स्नानं कृत्वा तदुपदिष्ट मार्गानुसरणं कृत्वेति यावत्, निर्वाणताया मोक्षपदस्य अधिगतये प्राप्तये कुशलीभवन्ति समर्था भवन्ति ॥ ८ ॥

जिनके योगरूप पर्वत से निकली हुई यशरूप विशाल नदी है, यह नदी संसार समुद्र में चारों ओर से व्याप्त होकर अत्यन्त शोभायमान हो रही है; जिसमें कतिपय सुकृती जन उल्लास पूर्वक स्नान करके, अर्थात् श्री स्वामी जी के उपदिष्ट सन्मार्ग का सरलता पूर्वक अनुसरण करके

मुक्तिपद के लिये अधिकारी हो जाते हैं। प्रत्येक को चाहिये कि स्वामी जी के प्रत्येक उपदेशों को और गुणों को ग्रहण करें, यह भाव है ॥ ८ ॥

यद्योगदर्शन सुहृष्ट हृदः सुवाचो
गन्धर्व किन्नरमुखा हिमशैल जीवाः ।
हंहो हिमाद्रिशिखरेषु वनेषु चैषु
गायन्ति संप्रति यदीययशो विचित्रम् ॥ ९ ॥

सम्प्रति इदानीं यस्य तपोवनयते योगिस्य संन्यासनिष्ठाया दर्शनेन सुहृष्टं सुप्रसन्नं हृत् चेतः येषां ते, तथा सुवाचः शोभनवाचः, गन्धर्वाः किन्नराः किं पुरुषा मुखे अग्रे येषां ते, गन्धर्व किन्नराद्या हिमशैल जीवा हिमाचलवासिनो देवयोनयः सङ्गीत प्रियाः, हंहो आश्चर्यम् एषु हिमाद्रे हिमालयस्य शिखरेषु शृङ्गेषु वनेषु वनस्थलीषुच, विचित्रं यदीय यशो यत्सम्बन्धिकीर्तिं गायन्ति स्तुवन्ति, यस्य यशोगान मामोदेन कुर्वन्ति । द्वयोरेतयोरपि श्लोकयो रनन्तरश्लोके नान्वयः ॥ ९ ॥

इस समय श्री स्वामी जी के संन्यास निष्ठा को देखकर, उससे प्रसन्न एवं प्रभावित हृदय वाले गन्धर्व किन्नरादि देवयोनि संगीत प्रिय हिमालय के निवासी इन हिमालय के शिखरों में वनों में जिनके विचित्र यश का आमोद पूर्व मुक्तकण्ठ से गायन कर रहे हैं। इन दो श्लोकों का भी आगे के श्लोक के साथ अन्वय है ॥ ९ ॥

योगाटवी सरणशीलन शालिनादं
वागाहवे विजितवादि मतङ्गजेन्द्रम् ।
तं योगिसिंह मतुलौजस मीड्यमानं
स्वामीति चाह पदवी मभिनन्दयामः ॥ १० ॥

योगाटव्यां योगरूपवने सरणशीलनशाली सञ्चरणाभ्यासनिर्भयो नादो महानुन्नतः शब्दो यस्य स तं, वागाहवे शास्त्रार्थविवाद युद्धे विजिताः पराभूता वादिन एव मतङ्गजेन्द्रा मत्तगजायेन स तं; अतुलौजसं निस्तुलवीर्यवन्तं, ईड्यमानं स्तूयमानं, स्वामी इति यस्य पदवीं सर्वश्रेष्ठं पद माह लोकोवदति। जन स्वामी सं न्यासी, वनस्वामी सिंह इत्युभयत्र योजनीयम्। तमेतादृशं योगिसिंहं यति रूपं पञ्चास्य मभिनन्दयामः एतादृशस्य अभिनन्दनं प्रशंसनं वयं कुर्मः कारयामश्च ॥ १० ॥

ज्ञानयोगप्रधान वेदान्त रूपी वन में निरन्तर सञ्चरण से निर्भय हुआ महान् उच्च गर्जन शब्द वाले—योगि पक्ष में वेदान्त सिद्धान्तों का उच्च गर्जन करने वाले—शास्त्रार्थ विचार के कलह में बड़े २ उन्मत्तगज स्वरूप वादियों को पराजित करने वाले, निरुपम वीर्यवान्, स्तुति करने योग्य, जिसके सर्व श्रेष्ठ पद को स्वामी नाम से लोग पुकारते हैं। जन स्वामी संन्यासी, वनस्वामी सिंह, स्वामिपद एवं दोनों में भी संबन्धित है। इस प्रकार के उस यतिसिंह की प्रशंसा हम सभी करते हैं; कराते हैं ॥ १० ॥

यो योगविभ्रम सुधारस पान भूमि-
र्वेदान्त तत्त्वभरिता च यदात्ममूर्तिः।
यद्वाक् च सोल्लसति देवगिराऽभिरामा
कामादिजिद् गुणगणैक महामहात्मा ॥ ११ ॥

यः प्रकृतो योगी योगविभ्रमस्य योगनिष्ठाभ्यासस्य यः सुधारसोऽमृतरसः तस्य पान भूमि रेकोऽद्वितीयः पाता, यस्य आत्ममूर्तिः सर्वं स्वरूपं वेदान्ततत्त्वज्ञानेन भरिता पूरिता च वर्तते, यस्य वाक् वाणी सा च देवगिरा सुरभारतीभाषणेन अभिरामा सदा सुन्दरा

सती उल्लसति शोभते, कामादिजित् कामक्रोधादिषट्शत्रुजेता गुणगणेषु गुणसमूहेषु एक एव महामहात्मा, एवम्भूतः स अन्यादृशोऽस्तीति शेषः ॥ ११ ॥

जो महातपस्वी योगनिष्ठारूप अमृत के पान करने में अद्वितीय ही हैं, और जिनकी आपाद मस्तक मूर्ति ही वेदान्त तत्त्व के ज्ञान रस से पूरित है; साथ ही जिनकी वाणी निरन्तर संस्कृत भाषण से अतिमधुर है, और जिन्होंने काम क्रोध, लोभ, मोह, मद, मात्सर्य इन षड्रिपुओं को भी अपने तेज से धर्षित कर दिया है, इस समय इस प्रकार के अनेक गुणविशिष्ट महात्मा केवल एक यही हैं ॥ ११ ॥

व्यासोऽथवा वियदुपेत शरच्छशाङ्कः
किं वा दशवतरणेऽन्यतमो महर्षिः ।
आहो स शङ्करयति भगवान् किमेष
श्रीमानयं विजयतेऽत्र तपोवनं सः ॥ १२ ॥

कोऽयं योगीति कवि र्विकल्पयति—व्यासो द्वैपायनः, अथवा वियदुपेतः वियति आकाशे उदितः शरच्छशाङ्कः शारदिकचन्द्रएव, किंवा किंस्वित् दशावतरणे दशर्षिषु भृग्वादिषु मध्ये अन्यतम एकतमो महर्षिरस्ति । आहो किमिति प्रश्ने, एष पुरोदृश्यमानो भगवान् स शङ्कर यतिः प्रसिद्धः शङ्करस्वामी एवास्ति । ईदृग्विकल्पविषयः श्रीमान् सोऽयं तपोवनं तत्तादृशोऽत्र विजयते विशेषेण जयति ॥१२॥

श्री स्वामी जी के तेजोमय दर्शन से यह विकल्प हो जाता है कि क्या ये व्यास हैं, अथवा शरद् ऋतु का चन्द्रमा है, अथ च क्या ये भृगु आदि महर्षियों में कोई एक महर्षि हैं । अहो क्या ये भगवान् श्रीशङ्कर स्वामी हैं । इस प्रकार नाना कल्पना के विषय तत्तादृश ये श्रीमान् स्वामी तपोवन जी इस हिमालय देश में विजय कर रहे हैं ॥ १२ ॥

प्रीणाति योऽत्र विविधानपि बुद्धिवृद्धान्
संछिद्य संशयचया नृतवाक्यसारैः ।
कुत्राद्य तद्यतिपते र्हि तपोवनस्य
दोधूयते यतिभवे न यशः पताका ॥ १३ ॥

अत्र अस्मिन् लोके य ऋतानि सत्यानि वाक्यानि ऋतवाक्यानि तेषां सारैः सत्यवचन सारै रुपनिषद्वाक्यसारैर्वा संशयचयान् शङ्कासमूहान् सं छिद्य अपाकृत्य विविधाननेक प्रकारानपि बुद्धौवृद्धा बुद्धिवृद्धा स्तान् मनीषिणः प्रीणाति प्रीतिं नयति। हिः प्रसिद्धिं द्योतयति। अद्य सम्प्रति तस्य यतिपते र्यतिवरस्य तपोवनस्य यशः पताका कीर्ति वैजयन्ती यतिभवे कर्मन्दिलोके कुत्र न दोधूयते। धूञ् कम्पने इत्यस्यधातोर्यङन्तं रूपम्। कुत्र न प्रकम्पते; अपितु सर्वत्रैव समुल्लसिता वर्तते। अखिल यति जनाना माननैः श्री स्वामि तपोवनस्य सुगाथा गीयते इत्यर्थः ॥ १३ ॥

हिमालय की दिव्य कन्दराओं में निवास करते हुए स्वामी जी वैदिक प्रमाणों के द्वारा सत्यवचनों से नाना प्रकार होने वाले शास्त्र संबन्धी संशयों को दूर करके प्रकाण्ड पण्डितों को भी यथेच्छ तृप्त कर देते हैं। यह प्रसिद्ध है कि आज इस यतिराज महात्मा जी की कीर्तिरूप पताका संन्यासि समाज में कहां नहीं शोभित हो रही है, अपितु सर्वत्र शोभित हो रही है, अर्थात् आपको सब संन्यासीजन जानते हैं और आपकी सुगाथा गाते भी हैं ॥ १३ ॥

ज्ञानप्रभापहत हृत्स्थघनान्धकारो
दिव्योदयाद्विकचसुज्ञजनारविन्दः

तेजःसमूहधवलीकृतदिक् समूहः
श्री सूर्यदेव उत भाति तपोवनं किम् ॥ १४ ॥

ज्ञानप्रभया ज्ञानप्रकाशेन अपहृतो दूरीकृतो हृत्स्थो बुद्धिगतो घनान्धकारो दृढतरमज्ञानं येन सः, दिव्यश्चासौ उदयो दिव्योदयो दिव्याविर्भावः, तस्मात् विकचा विकसिताः सुज्ञजना विबुधजना एव अरविन्दाः सरोरुहा यस्य सः, तेजसां विद्यातपोज्ञानादितेजसां समूहेन सङ्घेन धवलीकृतः श्वेतीकृतो दिक्समूहो दिशां समूहो येन सः, किमिति प्रश्ने, अयं श्री सूर्यदेवो भास्करो भाति उत अथवा तपोवनम् । श्री सूर्यदेव सदृशः शोशुभ्यते श्रीतपोवन मिति भावः ॥ १४ ॥

इस श्लोक में श्री स्वामी जी की तुलना श्री सूर्य भगवान से की गई है । जिन्होंने अपने ज्ञान के प्रकाश से लोगों की बुद्धिगत दृढ़ मोह दूर हटा दिया है, और जिनके दिव्य सन्निधान से विज्ञजन सूर्य के आने पर कमलों की तरह प्रसन्न हो रहे हैं, और जिनके विद्या, तप, ज्ञान आदियों के तेजः समूह से सब दिशा धवलित हो रही हैं, ऐसे ये कौन हैं ? साक्षात् भगवान् श्री भास्कर है, अथवा श्री स्वामी तपोवन जी ? ॥ १४ ॥

साधुः सुधीः सतत संस्तुतसाधुधर्मा
सौजन्यभूर्यतिगुणै र्विमलीकृतात्मा ।
संत्यक्तलोकविभवः प्रभुभूतिमग्नः
स्वामी तपोवन यतिर्जयतीह किन्न ॥ १५ ॥

सततं सर्वदा संस्तुतः सम्यक्श्लाघित आचरितः साधुधर्मः शिष्टजनमार्गो येन सः, यतिगुणैः संन्यासिधर्मैं र्विवेकवैराग्यादिभिः विमलीकृतः पवित्रीकृत आत्मा अन्तः करणं येन सः, सौ

जन्यभूः सुजनतानिधिः, अथ संत्यक्तः तिरस्कृतः लोकविभवो लौकिकभोगैश्वर्यं येन सः,प्रभुभूत्यामीश्वरीयैश्वर्यं मग्नःतच्चिन्तारसिकः, ईदृशोऽयं साधुः सुधी विद्वान् स्वामी तपोवनयतिः इह अत्रकिन्न जयति सर्वोत्कर्षेण वर्तते, जयत्येवेतिभावः ॥ १५ ॥

श्री तपोवन स्वामी जी ने सदैव जन्मत एव शिष्ट जनों के पथका ही अनुसरण किया, और विवेक, वैराग्य, शम, दम आदि संन्यासियों के गुणों से अपने अन्तःकरण को पवित्र बनाया है, इस प्रकार सज्जनता की मूर्त्ति, संपूर्ण लौकिक ऐश्वर्य को त्यागे हुए केवल ईश्वर भक्ति में, और ईश्वर विभूति में ही लीन, ये विद्वान् महात्मा यहाँ सदा जयशील ही हैं ॥ १५ ॥

योगस्य तत्त्व मुपदिश्य भियं निरस्यन्
यः संस्थितो यतिवरः प्रभुसौम्यकाश्याम् ।
कल्पस्य कल्पतरु रेष दयार्द्रदृष्ट्या
सर्वान् विलोकयति योगिवरो महात्मा ॥ १६ ॥

यो यतिवरो यतिपतिः सौम्या चासौ काशी सोमदेवताधिष्ठिता दिक् उत्तरा दिक्, तत्संबन्धिनी काशी उत्तरकाशी, प्रभो विश्वनाथस्य सौम्यकाशी तस्यां संस्थितः योगस्य ज्ञान भक्ति कर्मादि योगस्य तत्त्वं सार मुपदिश्य श्रावयित्वा, भियं लोकानां संसृतिभयं निरस्यन् परिहरन् वर्तते । स एष योगिवरो महात्मा कल्पस्य कल्प वृक्षस्यापि कल्पतरुः कामनापूरक इत्यतिशयोक्तिरलङ्कारः । दयया कृपया आर्द्रा दृष्टिर्विलोकनं तया सर्वान् निखिलान् विलोकयति पश्यति । समेषु समदर्शीति भावः । तथा च "समः सर्वेषु भूतेषु" इत्येतद्गीता वचन मन्वर्थयति ॥ १६ ॥

यह यतीन्द्र विश्वनाथपुरी सौम्यकाशी में—सोमदेवता से अधिष्ठित उत्तर दिशा में स्थित होने से, उत्तरकाशी को सौम्यकाशी नाम हुआ—रह कर कर्म, भक्ति, आदियों के तत्व का उपदेश करते हैं। ऐसे उपदेश के द्वारा सांसारिक भीतिको, जो कि अज्ञान से होती है, दूर निरास कर देते हैं, अर्थात् लोगों को विवेक से पूर्ण कर देते हैं। इस प्रकार के ये योगिवर महात्मा कल्प वृक्ष का भी कल्प बृक्ष, ज्ञानी, भक्त, धनी, मानी, सब की इच्छाओं को पूर्ण करने वाले हैं, और दया दृष्टि से सब को समान भावसे देखते हैं। तथा "समः सेर्वेषु भूतेषु" इस गीता वाक्य को चरितार्थ करते हैं ॥ १६ ॥

अन्तर्दुरूहतम भीमतमः समूहो
विघ्नश्च शाश्वतिक साधुविधान निघ्नः।
यद्योगिनः सुमहसा सहसाऽस्तमेति
धीनायकस्तव सदैव विनायकोऽस्तु ॥ १७ ॥

यद्योगिनो यस्य योगिनो यतेः सुमहसा योगजनितोज्ज्वल तेजसा अन्तर्हृदि दुरूहतमस्य अतिमात्रं दुरूहस्य दुर्वहस्य दुर्ग्रहस्यवा, भीम तमसो भयानकाज्ञानस्य यः समूहः, शाश्वतिकं सनातनं साधुविधानं वेदचोदितं पारम्परिकं सत्कर्म जातं निहन्तीति शाश्वतिक साधु विधान निघ्नः, यद्वा वैदिक सत्कर्मायत्तः। अधीनो निघ्न आयत्त इत्यमरः। तेन निवारयितुं शक्य इत्यर्थः। विघ्नः अन्तरायश्च सहसा झटिति अस्तं नाशमेति गच्छति। हे योगिन्! विनायको विघ्नेश्वरः सदैव तस्य तव भवतो धीनायको बुद्धिप्रेरकोऽस्तु, विघ्नादि निहनने सहकारी भवतु इति भावः ॥ १७ ॥

जिस योगी के योग जनित अप्रतिहत तेज से आन्तरिक अज्ञान ग्रन्थि रूप अन्धकार और वेद विहित परम्परा प्राप्त शुभ कर्मों को

निरन्तर नष्ट करने वाले, अथवा शुभ कर्मों से निवारण करने योग्य विघ्न भी सहसा निरस्त हो जाते हैं। हे योगिन् ! श्री विघ्नराज सदैव ही ऐसे तेजस्वी आपके सहकारी हो, अर्थात् विघ्नादियों को नष्ट करने में सहायक हों ॥ १७ ॥

संस्थापयन् जनमनस्सु विवेकभावं
द्वेषादिदोषनिकरं दलयंश्च नित्यम् ।
संबोधयन् यतिमनस्सु परेशभावं
सर्वत्र कीर्तिमयतां विततां स योगी ॥ १८ ॥

स योगी पूर्वोक्त यतिः नित्यं सर्वदा जनमनस्सु लोकानामन्तःकरणेषु विवेक भावं कार्याकार्यविवेकज्ञानं संस्थापयन् उत्पादयन्, द्वेषादीनां दोषाणां चित्तदोषाणां निकरं समुदयं दलयन् विनाशयन् यतिमनःसु मस्करिणां चित्तेषु परेशभावं "त्वं ब्रह्मासि" इत्युपदेशेन ब्रह्मभावं संबोधयन् ब्रह्मज्ञानं संजनयन्नित्यर्थः, सर्वत्र विततां विस्तृतां कीर्तिं मयतां गच्छतु प्राप्नोतु ॥ १८ ॥

सब अन्तरायों के विनाशक तेजोमूर्त्ति पूर्वोक्तयति जनता के चित्त में धर्माधर्म के विवेक ज्ञान को उदय करते हुए, तथा राग, द्वेष, लोभ, मोह आदि चित्त के दोषों को नष्ट करते हुए संन्यासी जनों के हृदय मन्दिर में ब्रह्म ज्ञान के उच्च भाव की प्रतिष्ठा कर सर्वत्र अपनी अक्षय कीर्ति को विस्तृत करें ॥ १८ ॥

न योगरिक्तं तव कार्यमस्ति
चेष्टा न ते व्यर्थफला कदापि ।

मनीषया निर्जित योगपीठ-
स्त्वमेव योगिन् यतिमौलिजूटः ॥ १६ ॥

हे योगिन् यते ! तव भवतः कार्यं कर्म कर्मकलापः, जात्येक वचनं; योगाद्रिक्तं योगरिक्तं तत्त्वज्ञाननिष्ठासंबन्धिकर्मविभिन्नं नास्ति, सर्वमपि कर्म तत्संबद्ध मित्यर्थः । अथ च ते भवतः चेष्टा साधारणः शारीरिकैन्द्रियिकव्यापारोऽपि सर्वः व्यर्थं फलं यस्याः सा व्यर्थफला निरर्थक परिणामा कदापि न भवति । मनीषया धिया विवेक बुद्ध्या निर्जितं वशीकृतं योगपीठं योग स्थानं येन स इति, इत्थं सन् त्वमेव भवानेव यतीनां मौलिजूटो मौलिबन्धः यतिशिरोभूषणमसीति निश्चप्रचमिति भावः ॥ १६ ॥

हे तपस्विन् ! आपके जितने भी कर्म हैं, वे सब तत्त्वज्ञान संबन्धी ही हैं, और आप साधारण शारीरिक आदि जिस जिस चेष्टा को करते हैं, वह भी सब अवश्य ज्ञानोपयोगी उपदेशरूप ही होती हैं । एवं आपने अपनी बिवेकमयी तीक्ष्ण बुद्धि के द्वारा योग के सर्वोन्नत स्थान को अधिगत कर लिया है । अतः आप निश्चय सब यतियों से अत्यन्त श्रेष्ठ हैं ॥ १६ ॥

यदीय संसर्गवशेन सद्यो
मन्दोऽपि धीमत्पद मातनोति ।
जयत्यहो ज्ञाननिधिर्महात्मा
तपोवनं सोऽत्र तपोवनेषु ॥ २० ॥

यदीयस्य यत्संबन्धिनः संसर्गस्य सङ्गते वशेन द्वारा, मन्दोऽपि मूढमतिरपि धीमतां बुद्धिमतां विशिष्ट ज्ञानिनां पदं स्थानं सद्यः तत्क्षण मातनोति लभते । अहो इत्थंभूतो ज्ञानस्यनिधि र्ज्ञाननिधि-

योगतत्त्ववेत्ता स महात्मा तपोवन मत्र हिमगिरौ तपोवनेषु तपः स्थलीषु जयति ज्ञानामृतरस रसिको विराजते ॥ २० ॥

अत्यन्त मूर्ख जन भी जिन महात्मा की सत्सङ्गति को प्राप्त कर तत्क्षण ही ज्ञानवान् हो जाता है। आश्चर्य और सौभाग्य की बात है कि इस प्रकार के यह आत्म ज्ञान के पूर्णवेत्ता महात्मा श्री तपोवन जी इस हिमगिरि में एकान्त तपोभूमियों में ब्रह्म रस के आस्वादन से आनन्दित होते हुए विराज रहे हैं ॥ २० ॥

न तत्र रोगो न भयं कुतश्चिद्–
द्वेषो यतिर्यत्र विराजतेऽयम् ।
तपः प्रभावानलतेजसा तद्–
दीप्तं पदं योगिपदं तदस्य ॥ २१ ॥

यत्र अयं यति महात्मा विराजते निवसति, तत्र तस्मिन् स्थाने रोगो व्याधिर्न, नास्ति, कुतश्चित् कस्माच्चिदपि भयं भीतिरपि न, नास्ति, द्वेषः शत्रुता नास्ति। तत् पदं स्थानं तपसः प्रभाव एवानलोऽग्निः तस्य तेजसा प्रतापेन दीप्तं द्योतितं भवति। तद् अस्य योगिपदम्, अहो! तत्तादृशोद्भटतेजोभासुर मस्य यतीन्द्रस्य योगिपदं संन्यासिपदं, योगपदवी प्रौढिमेत्यर्थः ॥ २१ ॥

जिस स्थान में यह यतिवर रहते हैं, वहां आधि व्याधि नहीं, कहीं से भी कोई भय नहीं, द्वेषादि दुष्ट भाव भी नहीं देखे जाते हैं, और वहां पर आनन्दमय जीवन व्यतीत होता है। वह स्थान उनके तपः प्रभावरूप अग्नि के तेज से देदीप्यमान हो जाता है। अहो! ऐसे प्रचण्ड तेज से भासुर हुआ इनका योग गौरव विचित्र है ॥ २१ ॥

तदत्त्वयं योगबलं प्रकाश्य
सान्तं बलं वैषयिकं निरास्य।
प्रभातगेयो भुवि वन्दनीयः
स योगिदेवोऽत्र तपोवनाख्यः ॥ २२ ॥

अत्र भुवि अस्मिल्लोके स प्रकरणस्थो योगिदेवो यतिदेवः तद् अत्त्वय मपत्त्वयरहितं योगबलं ज्ञानशक्ति माहात्म्यं प्रकाश्य सर्वेषां दृष्टिपथं नीत्वा। अन्तेन सहितं सान्तं विनाशशीलं वैषयिकं विषयेभ्यो जातंबलं निरास्य, निरस्येति वा पाठः, तस्य निरासनं निरसनंवा कृत्वेत्यर्थः। एवं वर्तमानः सन् प्रभातगेयः प्रातःकाले गान योग्यो वन्दनीयः पूजनीय श्च विभ्राजते इति शेषः ॥ २२ ॥

इस लोक में श्री स्वामी तपोवन जी महाराज ने योग का वल कितना परिमाण पाञ्चभौतिक विषयों के वल से ऊँचा है, इस प्रकार यह तथ्य स्वानुभव के द्वारा जनता के समक्ष रखा है। तदनु विवेकियों को दृढ़ता पूर्वक मालूम पड़ा कि वस्तुतः विषय संबन्धि बल क्षणिक, तुच्छ, और त्याज्य है। ऐसे ज्ञान के दाता स्वामी जी पूजनीय तथा प्रातःकाल गाये जाने योग्य हैं ॥ २२ ॥

शीतातपं दुः सहवर्षणञ्च
प्रसह्य सर्वं स महावधूतः
हिमाद्रिशृङ्गेषु वसन् श्रमंश्च
ज्योतिः परं ध्यायति चेतसीह ॥ २३ ॥

स प्रकृतो महांश्चासौ अवधूतः परमहंसप्रवरो महावधूतः, इह अत्र हिमाद्रेः पर्वतराजस्य शृङ्गाणि तेषु हिमाद्रिशृङ्गेषु वसन् वसति

कुर्वन्, भ्रमंश्च चङ्क्रमणञ्च विदधत् शीतातपं हिमं प्रचण्डसूर्य किरणांश्च दुःसहं दुःखेन सोढुं योग्यं वर्षणं जलवृष्टिञ्च सर्वमेतज्जनितं सकलमपि कष्टं प्रसह्य तितिक्षमाणो बलात्, चेतसि मानसे परं चिदात्मकं ज्योतिः सच्चिदानन्दघनं ब्रह्म ध्यायति सदा चिन्तयति ॥ २३ ॥

यह महामना परमहंसवर्य यहां हिमाचल के शिखरों में निवास करते तथा घूमते हुए, हिम के शीत एवं तीव्र गर्मी और वर्षा को भी अर्थात् तज्जनित सारे कष्ट को बलपूर्वक सहन कर चित्तमें सदा उस सच्चिदानन्द परब्रह्म का ध्यान कर रहे हैं ॥ २३ ॥

तद् दुर्लभं मोक्षपदं लभस्व
भवोपकारं तपसा कुरुष्व ।
शश्वत्सुखं भुङ्क्ष्व सकृद्विभातं
संप्राप्नुहि त्वं भुवनोत्तरं शम् ॥२४॥

कविः स्वकीयां भद्रभावना मुपन्यस्यति महत्या श्रद्धया—

हे स्वामिन् त्वं भवान् तपसा स्वतपोबलेन, तत् शास्त्र प्रसिद्धं दुर्लभं दुष्प्राप्यं मोक्षस्य जीवन्मुक्तेः पदं स्थानं लभस्व प्राप्नुहि। भवस्य संसारस्य उपकार मुपकृतिञ्च कुरुष्व यथावद् विधेहि। सकृद्विभातं सन्ततं प्रकाशमानं शश्वत् सनातनं सुखं ब्रह्मसुखं भुङ्क्ष्व आस्वादय। तथा भुवनोत्तरं लोकातीतं दिव्य-मित्यर्थः, शन्निरतिशय शान्तिं संप्राप्नुहि सम्यगत्यन्त माधत्स्व ॥ २४ ॥

हे स्वामिन् ! आप अपने तपोबल से उस दुष्प्राप्य अत्युच्च जीवन्मुक्ति पद को प्राप्त करें और संसार का भी कल्याण करें। सदैव

स्वमहिमा में प्रकाशमान ब्रह्मसुख में लीन रहें, एवं उस दिव्य शान्ति को प्राप्त करें जोकि उच्च विभूतियों को ही प्राप्त है। इस श्लोक में गुणग्राही विद्वान् कवि ने बड़ी श्रद्धा के साथ स्वामी जी के प्रति अपनी शुभ भावना का उल्लेख किया है ॥ २४ ॥

अयं महात्मा महनीय कीर्त्ति–
योगव्रती ज्ञानधनी विपश्चित् ।
स्वशिष्यवर्गैः परितः परीतः
संशोभते सर्वजनार्च्यमानः ॥२५॥

महनीया प्रशंसनीया कीर्तिर्यशो यस्य स महनीय कीर्तिः, व्रतोऽस्यास्तीति व्रती योगस्य व्रती योगव्रती योगानुष्ठाता, ज्ञानस्य धनी ज्ञान धनी ज्ञानमात्रधनवान्, विपश्चिद् विद्वान्, अयं महात्मा प्रस्तुतः स्वामी स्वस्य शिष्याः स्वशिष्याः तेषां वर्गा स्तैः स्वशिष्यवर्गैः स्व श्रोतृसङ्घैः परितोऽभितः परीतः परिवृतः, सर्वजनैरर्च्यमानः पूज्यमान श्च सन् संशोभते सम्यग् भासते ॥ २५ ॥

सब लोगों से पूजे जाते हुए ये महात्मा वस्तुतः प्रशंसा के पात्र हैं। इस योग निष्ठ अपरिग्रही ज्ञानी एवं शास्त्रज्ञ स्वामी जी की जितनी भी प्रशंसा तथा स्तुति की जाय वह न्यून ही प्रतीत होती है। यह पवित्रात्मा उत्तरकाशी, ऋषीकेश अथवा जहाँ तहाँ अपने शिष्य और भक्त वर्गों से घिरे रहते हुए शोभित हो रहे हैं ॥ २५ ॥

अयं स्वधर्मः श्रुति सिद्ध एव
जगद् विपद् व्यूह निवारणं यत् ।

स एव साधोऽद्य विपन्निमग्नः
सुरक्षणीयो नियमादिभिः स्वैः ॥२६॥

यत् विपदां व्यूहः समूहः विपद्व्यूहः जगतो विपद्व्यूहो जगद्विपद्व्यूहः तस्य निवारणं नाशन मस्ति, अयं श्रुतिसिद्धः श्रुति प्रोक्तः सनातनः स्वधर्मः स्वस्य संन्यासिनो धर्म एव। हे साधो यते ! अद्य इदानीन्तने काले स एव कथ्यमानः सनातनो धर्मः, विपदि नास्तिकता गर्ते निमग्नो निपतितो दृश्यते। अतएव स स्वैः स्वकीयैर्नियमादिभि रीश्वर भजन प्रार्थनादिभिर्नियत क्रियाभि रूपायैः सुरक्षणीयः सुष्ठु पालनीय उद्धरणीय इत्यर्थः ॥ २६ ॥

सांसारिक विपत्तियों का निवारण करना, यह श्रुति सम्मत, सनातन संन्यासी का स्वधर्म ही है। परन्तु हे महापुरुष ! इस वक्त वह सनातन वेद विहित धर्म ही विपत्ति ग्रस्त है। अतएव अपने ईश्वर भजन, पूजन, प्रार्थना आदि पुण्य क्रियाओं से उसकी रक्षा अवश्य करनी चाहिये ॥ २६ ॥

अनर्गलं पुण्य चयोपलभ्यं
द्वारं मतं स्वर्ग निकेतनस्य।
परं त्वदीयन्तु तदूर्ध्वमेव
तद् दुर्लभं द्वार मपुण्यलभ्यम् ॥२७॥

स्वर्गनिकेतनस्य स्वर्गलोकस्य अनर्गलं कील रहितं बन्धन मुक्तं द्वारं द्वाःस्थानं, स्वर्गलोक प्रवेश इत्यर्थः, पुण्यचयेन सुकृत समवायेन उपलभ्यं प्राप्यं मतं ज्ञातं, स्वर्गकामो यजेत इत्यादि श्रुतेः। हे योगिन् परंतु किन्तु त्वदीयं त्वत्संबन्धि दुर्लभं दुष्प्रापम्

अपुण्यलभ्यं पुण्यपाप तत्फलातीतं ज्ञान मात्रलभ्य मित्यर्थः, तत् श्रुतिप्रसिद्धं द्वारं तदूर्ध्वं मेव तस्मात् स्वर्गादिलोका दुपर्येव वर्तते। ब्रह्मस्वरूपभूतं मोक्षपदं ज्ञान साधनकं स्वर्गादिलोक विलक्षण मित्यर्थः। अहो ! तत्तादृशभवादृशा अपवर्ग जीवनाः प्रातः स्मरणीया इति भावः ॥ २७ ॥

वैषयिक सब आनन्द का आगार स्वर्ग कहा जाता है जो कि सुपुण्यों से प्राप्त होता है। पुण्यवान को स्वर्ग का दरवाजा खुला मिलता है। किन्तु हे स्वामिन् ! आप स्वर्गादि लोकों के कामुक नहीं हैं, आप स्वर्गादियों से उपरिगत, श्रेष्ठ, कितने पुण्य से भी अलभ्य, ज्ञान मात्र से लभ्य, मोक्ष द्वार के अधिकारी हैं। आप जैसे सर्वोत्कृष्ट मोक्ष पद में विराजमान पवित्रात्मा प्रातः स्मरणीय होते हैं, यह भाव है ॥ २७ ॥

समस्त संसार इहास्त्य सारो
भ्रान्त्युद्भवो बन्धन रूप एव।
दुःखाकरो राग इति प्रसिद्ध-
स्त्यागो विवेकः परमो मतोऽत्र ॥ २८ ॥

इह अस्मिंल्लोके समस्तः संपूर्णः संसारः संसारव्यवहारः, विहितोऽविहितश्च सांसारिक व्यवहार इत्यर्थः, असारः सारः सत्ता तेन रहितः, भ्रान्त्या भ्रमाद् उद्भव उत्पत्तिर्यस्य सः, अथच बन्धनरूपो जन्ममरणादिचक्रिका भ्रमणहेतुरेवास्ति, अतएव दुःखस्य आकरो निधानं रागो रागमूलक इति इत्थं प्रसिद्धः। परञ्च अत्र अस्मिन् संसारे त्याग इहपरलोकभवेषु सर्वं विषयेषु निःस्पृहता परमः श्रेष्ठतमो विवेको मतोऽवबुद्धः, श्रेष्ठ तमं विवेक फल मिति च प्रसिद्ध मित्यर्थः ॥ २८ ॥

इस लोक में अच्छा बुरा संसार का सारा कर्म भ्रान्तिमूलक, असार, तथा जन्म मरणादि बन्धन देने वाला ही हैं। इस कारण निरन्तर दुःख का भी हेतु है। प्रसिद्ध है कि यह राग से ही उत्पन्न होता हैं। परञ्च इस संसार में महान् श्रेष्ठ विवेक यह है कि ऐहिक पारलौकिक सब विषयों में निःस्पृहता प्राप्त करें, यह भी शास्त्र में प्रसिद्ध है ॥ २८ ॥

जीवोऽस्त्ययं ब्रह्म नितान्त शान्तं
विज्ञाय चैवं सदसत् समुत्सृजन् ।
संन्यास धर्मेण समाधिनिष्ठा–
मानन्द देहां जगृहे स तूर्णम् ॥ २९ ॥

अयं अहमहमिति प्रतीति विषयो जीवो जीवात्मा, नितान्त मत्यन्तं शान्त मद्वैत मद्वितीयं ब्रह्मास्तीति चैवम् अनेन प्रकारेण सर्वं विज्ञाय विशेषेण विदित्वा, सदसत् सत्यं व्यवहारिकं घटपटादिक मसत्यं प्रातिभासिकञ्च रज्जु भुजङ्ग शुक्तिरजतादिक मुभयविधं जगत् समुत्सृजन्, निखिलमपि संसारं सन्त्यजन्नित्यर्थः। स प्रकृतोऽय मस्मत्स्वामी संन्यासस्य धर्मः संन्यासधर्म स्तेन संन्यास धर्मेण सर्वत्यागरूपेण आनन्ददेहा मानन्दस्वरूपिणीं समाधिनिष्ठां ब्रह्मणि नित्यनिरन्तरावस्थितिरूपां तूर्ण माशु जगृहे गृहीतवान्॥२९॥

और यह जीवात्मा नित्य शान्त अद्वितीय ब्रह्म ही है, इस प्रकार सब विशेष रूप से जानकर अपने स्वामिवर्य ने सदसदात्मक इस संसार का युवावस्था में ही परित्याग किया, और सर्व त्याग रूप संन्यास धर्म का ग्रहण किया, तथा उसके द्वारा नित्य निरन्तर ब्रह्म में अवस्थिति रूप आनन्दमय समाधिनिष्ठा को भी प्राप्त कर लिया ॥ २९ ॥

तपोनिधिर्यः शमदीप्तियुक्तः
स्वभाव शुद्धो विषयेषु मुक्तः ।
ध्यान प्रकर्षेण समाहितात्मा
जीयाच्चिरं स्वामि तपोवनं सः ॥ ३० ॥

यो विषयेषु मुक्तो विषयनिर्मुक्तः शब्दस्पर्शादि विषयासङ्ग शून्य इत्यर्थः, शमदीप्त्या शान्तिभासा युक्तः समन्वितः, स्वभावशुद्धः स्वभावेन प्रकृत्या शुद्धः पवित्रः, तपोनिधिः तपसां तपश्चर्याणां निधिर्मूर्तिः, ध्यानस्य आत्माकारवृत्तिप्रवाहस्य प्रकर्षेण नैरन्तर्येण समाहितः सुशान्त आत्मा अन्तःकरणं यस्य स समाहितात्मा अस्ति, स तादृशः स्वामि तपोवनं चिरं चिरकालपर्यन्तं जीयात् जयं प्राप्नुयात् ॥ ३० ॥

शब्द स्पर्शादि विषयों से होने वाले सुख को छोड़े हुए शान्तिमय जीवन को धारण कर प्रकृति से ही पवित्र यह तपस्या की मूर्ति श्री स्वामी तपोवन जी महाराज, जिन्होंने अपने मन को निरन्तर आत्मचिन्तन से समाहित कर लिया है, वे अधिक काल तक विजय पूर्वक जीते रहें ॥ ३० ॥

निरन्तरं ब्रह्मविचारलीनः
श्रेयः पथाचार विचार दक्षः ।
योगानुभावेन महोन्नतो यो
विभ्राजते योगितपोवनं सः ॥ ३१ ॥

यो निरन्तरं शश्वत् ब्रह्मणः परमात्मनस्तत्संबद्धवेदान्तादि शास्त्राणां च विचारे चिन्तने लीनः तत्परः, श्रेयसः परमकल्याणस्य

पन्था मार्गः तस्य आचार आचरणं विचारश्च विचारणं तयो र्दक्षः कुशलः, योगस्य संन्यासयोगनिष्ठाया अनुभावेन प्रभावेण महांश्चासावुन्नतो महोन्नतः महोच्छ्रितः, स तादृशोब्रह्मवेत्ता योगी चासौ तपोवनं योगितपोवनं स्वामी विभ्राजते विशेषेण भासते ॥ ३१ ॥

जो महान् यति सदैव ब्रह्मविषयक तथा ब्रह्मसंबन्धि वेदान्तादि शास्त्र विषयक चिन्तन अर्थात् ब्रह्मज्ञान में ही लगे हुए हैं, और श्रेयों मार्ग के आचरण में तथा विचारण में अति कुशल हैं, एवम्भूत श्री स्वामी तपोवन योग के प्रभाव से गरिष्ठ होकर विशिष्ट शोभा को प्राप्त हो रहे हैं ॥ ३१ ॥

दैवै र्गुणैः प्राप्त बृहत्प्रभावा
निश्शेषहृद्दोष निषूद शूराः ।
शश्वत्समासादित साधुभावा
जयन्तु ते स्वामि तपोवनाख्याः ॥ ३२ ॥

निश्शेषा निखिला ये हृदः चित्तस्य दोषा रागादयो विकाराः तेषां निषूदे नाशने शूराः पराक्रमिणः, दैवैर्दिव्यैर्गुणैर्ज्ञान वैराग्यादिभिः प्राप्तो लब्धो बृहत्प्रभावो महान् प्रतापो यै स्ते प्राप्तबृहत्प्रभावाः, शश्वत् सततं समासादितः समधिगतः साधुभावः सज्जनता यै स्ते शश्वत्समासादित साधुभावाः, ते प्रख्याताः स्वामि तपोवनाख्याः तन्नामानः स्वामिनो जयन्तु विजयन्ताम् ॥ ३२ ॥

सम्पूर्ण मानसिक रागादि विकारों को दूर कर ज्ञान वैराग्य आदि दिव्यगुणों के द्वारा दूर २ देश तक अपने यौगिक प्रभाव को फैलाये हुए और सौजन्य की मूर्ति स्वामी महानुभाव तपोवन महाराज सदा विजयशील बनें ॥ ३२ ॥

बुधेऽनुरक्ति र्विमते विरक्तिः
परेशभक्तेषु च यत् सुभक्तिः ।
परोपकारे परमा प्रवृत्ति-
स्तपोवनं सोऽस्ति यतीन्द्र मूर्तिः ॥ ३३ ॥

यतीना मिन्द्रः सम्राट् तस्य मूर्तिः शान्तं स्वरूपं यस्य सः, तपोवनं स्वामी स एताहृगस्ति, यस्य बुधे सूरिणि अनुरक्तिः प्रेम, विमतें मूढे विद्वेषिणि वा विरक्ति रौदासीन्यं, परश्चासा वीशः परेशः तस्य भक्तेषु अनुरक्तेषु च यत् यस्य सुभक्तिरुच्चतरो भक्ति भावः, परोपकारे परस्यान्यस्य उपकारे उपकारकरणे यस्य प्रवृत्तिः न केवलेच्छामात्रमिति; तत्र यः सततोद्योगशील इति यावत् ॥३३॥

शम प्रधान यतियों के भी यति श्री स्वामी तपोवन जी का स्वभाव इस प्रकार का है कि वे विद्वानों से प्रेम करते हैं और मूढ़ एवं विद्वेषी जनों से उपेक्षा रखते हैं, उस आनन्दकन्द परमात्मा के जो भक्त हैं उनमें भक्ति भाव भी रखते हैं, और सदैव परोपकार करने की इच्छा ही नहीं स्वयं प्रयोगात्मक उद्योग भी करते हैं ॥ ३३ ॥

यो योगनिष्ठो विदुषां वरिष्ठो
यः शान्तिमान् ब्रह्मविदां विशिष्टः ।
योऽहैतुक प्रेमनिधि र्गभीरो
वन्द्यः स नो कस्य महात्ममौलिः ॥ ३४ ॥

यः तपस्वी विदुषां पण्डितानां वरिष्ठो वरेण्यः, योगनिष्ठो योग युक्तः समाधिमानस्ति । यः स्वामी ब्रह्मविदां ब्रह्म विदन्तीति ब्रह्मविदः तेषां ब्रह्मज्ञानां मध्ये विशिष्टः प्रमुखः शान्तिमान् प्रसन्न

चित्तः तिष्ठति । यो गभीरो गम्भीरः अहैतुक प्रेम्णो निष्कामानुरागस्य निधि निधानं स्थानं, स पूर्वोक्तो महात्मनां महाशयानां मौलिः शिरोभूषण मग्रगण्य इति भावः, कस्य कस्य पुरुषस्य नो वन्द्यो वन्दनीयः अपितु सर्वेषां पूज्य एव भवति ॥ ३४ ॥

जो तपस्वी विद्वानों में श्रेष्ठ, साथ ही योगनिष्ठ और ब्रह्मवेत्ताओं में भी प्रमुख शान्ति प्रिय हैं । एवं निष्काम प्रेम के धनियों के भी धनी हैं, अर्थात् निष्काम भाव से सब को एक दिव्य प्रेम दृष्टि से देखते हैं, एवम्भूत गंभीरमूर्ति महात्माओं में अग्रगण्य श्री स्वामी तपोवन योगी किस के वन्दनीय न होंगे, अपितु, सब के हीं पूज्य हैं ॥ ३४ ॥

व्यलोकि नेदृक् सुयति र्हि कश्चि-
दपूर्वएवैष विभाति तादृक् ।
कथं भवेन्नात्र तथा यतोऽयं
महामनस्वी हिमवद्विभूतिः ॥ ३५ ॥

हिरत्रावधारणार्थकः। निश्चयेन कश्चिद् अन्यः सुयतिः श्रेष्ठो यतिः ईदृग् एतादृशो न व्यलोकि विलोकितः । अपूर्व एव आश्चर्यवदेव एष तपोवनं विभाति विशेषेण शोभते । तादृक् तत्समानोऽन्यः कथं केन प्रकारेण भवेत् स्यात् । तथा तत्सदृशः अत्रास्मिन् भारते वर्षे इदानीं नास्ति । यतोऽयं योगी महांश्चासौ मनस्वी महामनस्वी सर्वाधिकज्ञानविज्ञानवान् हिमवतो हिमालयस्य विभूति रैश्वर्य मेवास्तीति, तेनैव हिमाचलो गरिष्ठो वर्तत इति भावः ॥३५॥

अन्य कोई भी इस प्रकार का यतिवर्य देखने में नहीं आया है, क्योंकि ये आश्चर्य तुल्य ही प्रकाशित हो रहे हैं, अर्थात् इन का दर्शन ही सब तरह से अपूर्व है । इस तरह के अन्य हों भी कैसे सकते हैं ?

इस समय इनके सदृश यहां कोई नहीं है। यह महामतिमान् यति पर्वत राज की साक्षात् विभूति हैं; पर्वत राज इन से गौरव को प्राप्त हो रहे हैं ।। ३५ ।।

येषां परार्थं वचनं वपुश्च
ज्ञान प्रपूर्णश्च मनः यदीयम् ।
ते साधुवर्या हि तपोवनाख्या
हृष्यन्ति पीयूष हृदो यतीन्द्राः ।। ३६ ।।

येषां योगिना मित्यादरार्थे बहुवचन मेकत्वेऽपि, वचनं वाग्व्यापारो वपुश्च शरीरं परस्मा इदं परार्थं परकल्याणार्थ मित्यर्थः, यदीयं मनश्चित्तं ज्ञानेनप्रपूर्णं ज्ञान प्रपूर्णं ज्ञानसंपन्नञ्च वर्तते। पीयूषं ब्रह्मस्मरणसुधा हृदि मानसे येषान्ते, यद्वा पीयूषवन्मधुरं हृद् येषान्ते पीयूष हृदः, साधुवर्याः साधुशिरोमणयस्ते तत्तादृशाः तपोवनाख्या स्तदभिधाना यतीन्द्राः हृष्यन्ति हि प्रसन्ना विराजन्त इति सुविदितं लोके ।। ३६ ।।

जिस योगी की वाणी तथा शरीर भी दूसरों के कल्याणार्थ ही है, और मन ज्ञान से पूर्ण है, क्योंकि इस योगी ने अपनी तपस्या से दुर्दम्य चञ्चल मन को भीं स्ववश कर लिया है। अतएव निरन्तर ब्रह्म स्मरणरूप सुधा को हृदय में सदा आस्वादन करने वाले, यद्वा अमृत समान मधुर हृदय वाले साधु शिरोमणि ये तपोवन नामक यतीन्द्र सदैव प्रसन्न मुद्रा में ही रहते हैं, यह सब लोगों को विदित है। वस्तुतः सर्व त्यागी ब्रह्मवेत्ता पुरुष तो द्वैत भावना से ऊपर सर्वदा प्रसन्न ही रहा करतें, यह भाव है ।। ३६ ।।

यस्य प्रसादेन तमो निहन्तुं
शक्ता अनेके यतयोऽपि गाढ़म् ।
तपोवनं तत्त्व विदं गुणाढ्यं
तं नौमि बद्धाञ्जलि मस्तकोऽहम् ॥ ३७ ॥

अनेके यतयो बहवो योगिनोऽपि यस्य प्रसादेन अनुग्रह-सहितया सङ्गत्या गाढ मनादिकाल प्रवृत्तं तमः अविद्यारूप मन्धकारं निहन्तुं दूरीकर्तुं शक्ताः शक्तिमन्तः अभूवन्नितिशेषः । अहं बालकृष्णाह्वयः, बद्धाञ्जलिना सहितो मस्तको यस्य स बद्धाञ्जलि मस्तकः करशिरः संयोगानुकूल व्यापारवान् सन्नित्यर्थः, तत्त्वं वेत्तीति तं तत्त्वविदं सच्चिदानन्द ब्रह्म विदं तदभिन्नं गुणैराढ्यं गुणाढ्यं दिव्यगुणवन्तं तं तपोवनं नौमि तद्गुणान् कीर्तयामि ॥ ३७ ॥

अनेक साधु संन्यासी लोग भी जिनके अनुग्रह एवं संसर्ग से अविद्या को नष्ट कर आत्मा के विशेष ज्ञानी हुए हैं, एवम्भूत सर्वगुणागार ब्रह्मवित् ब्रह्मरूप स्वामी तपोवन जी की मैं हाथ जोड़कर स्तुति करता हूँ, उनके गुणों का कीर्तन करता हूँ ॥ ३७ ॥

विद्यालताया विटपी विशालः
सौहार्द वृक्षस्य महालवालम् ।
विज्ञानभानो रुदयाचलोऽयं
जीयाच्चिरं स्वामि तपोवनं सः ॥ ३८ ॥

अयं प्रस्तुतो यतिः विद्या एव लता वल्ली तस्या विद्यालताया विशालो विस्तीर्णो विटपी वृक्षः, सर्वाङ्गपूर्ण विद्यावानित्यर्थः ।

सुहृदो भावः सौहार्दं तस्य वृक्षस्य द्रुमस्य स्निग्धतारूप वृक्षस्य महदालवाल भावापो महालवालं वर्तुलाकारो वृक्षमूलकृतजलाधार इवेत्यर्थः। विज्ञानस्य विशेषज्ञानस्य आत्मादिपदार्थानामपरोक्षानुभवस्य भानोः सूर्यस्य उदयाचलः पूर्वदिगि व, विज्ञानस्य उद्दीपनस्थानमित्यर्थः। स एवं विधः स्वामि तपोवनं चिरं जीयात् जयं कुर्यात् ॥ ३८ ॥

यह यति विद्यारूपी लता के लिये विशाल वृक्ष हैं और प्रेम रूपी वृक्ष के चारों तरफ के जलाशय के तुल्य हैं तथा विज्ञान रूपी सूर्य के लिये उदयाचल ही हैं, अर्थात् ये विद्या का विशाल आश्रय हैं, स्नेह के स्रोत और विज्ञान के प्रकाश स्थान हैं। अतः ऐसे महात्मा तपोवन जी संसार में दीर्घकाल तक विजयी बनें ॥ ३८ ॥

विज्ञानसारः कलुषप्रहारो
योगप्रसारश्च भवोपकारः।
पुण्यप्रचारोऽप्यपवर्गचारः
सर्वप्रसार स्त्वयि योगिराज ॥ ३९ ॥

योगिराज ! योगिनां राजा योगिराजः, राजाहःसखिभ्यष्टच्, तस्य संबुद्धिः; हे मस्करीन्द्र ! त्वयि भवति कलुषस्य तमसः अज्ञानस्य पापस्य वा प्रहारः प्रहरणसाधनं, विज्ञानस्य विशिष्ट ज्ञानस्य सारः तत्त्वं; तथा भवस्य संसारस्य उपकार उपकारोपायभूतो योगस्य प्रसारो विस्तार आस्ति; अपवर्गस्य मोक्षस्य चारः चरणं साधनभूतः पुण्यस्य सुकृतस्य प्रचारः प्रचयोऽपि वर्तते; अतएव सर्वप्रसारः सर्वेषां समस्तश्च योहेतुपदार्थानां प्रसारः प्रसरणं समवायेन स्थितिः त्वय्येवास्तीति ॥ ३९ ॥

हे संन्यासिवर्य ! आपके पास अज्ञान के अथवा पापों के ध्वंस करने में समर्थ विज्ञान का रहस्य है और समस्त संसार का उपकारक योग का विस्तार भी है। मोक्ष के साधनभूत पुण्य का सञ्चय भी है अर्थात् पुण्य का प्रचारण भी आप करते हैं। इस प्रकार आप में सब श्रेयः साधनों का समुदाय एकत्र विद्यमान हैं, अर्थात् आप सब कुछ हैं, आप संसार का कल्याण सब प्रकार करने में समर्थ हैं ॥ ३९ ॥

यः सौम्य काश्यां प्रभुपाद भक्त-
स्तपः समाधौ निरतोऽन्य वर्जम् ।
निवेश्य चित्तं हृदयांबुजन्म-
न्यात्मान मात्मन्यवलोक्य भाति ॥ ४० ॥

प्रभुपादयोः शम्भुचरणयो भक्तोऽनुरक्तो यः सौम्यकाश्या मुत्तरकाश्याम्, अन्यवर्जं सर्वान् व्यवहारान् विवर्ज्य तपः समाधौ तपस्यारूपे ब्रह्मध्याने निरतः तत्परः, हृदयाम्बुजन्मनि हृदय कमले चित्तं मानसं निवेश्य निरुध्य आत्मनि तच्चित्ते आत्मानं प्रत्यक् चैतन्यं स्वस्वरूप मवलोक्य अविच्छिन्नतया साक्षात्कृत्य भाति विद्योतते। तं नौमीत्यग्रिमपद्येन संबन्धः। श्लोकेषु तत्र तत्र शब्दस्यार्थस्य च पुनरुक्ति र्न दोषाय, विवक्षितार्थविशदीकरणार्थ-त्वात् स्तुतिपरत्वाद्वा ॥ ४० ॥

उत्तरकाशी में रहकर श्री विश्वनाथ जी के पूर्ण भक्त श्री स्वामी जी महाराज दुनियां के सभी व्यवहारों को छोड़कर केवल समाधि रूप तपस्या में ही लीन रहते हैं। हृदय कमल में चित्त को लगाकर स्वस्वरूप प्रत्यगात्म चैतन्य का अविच्छिन्न अनुभव करते हुए भासमान हो रहे हैं ॥ ४० ॥

ज्ञानार्जितेन तपसाऽपि च शुद्ध भक्त्या
संप्राप्य साधुपदवीं सुकृतोपलभ्याम् ।
श्री व्याससूनुरिव योगपदाधिरूढं
तं नौमि साञ्जलि रहं यतिलोकनाथम् ॥ ४१ ॥

साञ्जलि रञ्जलि बन्धेन सहितोऽहं ज्ञानेन अर्जितेन संपादितेन ज्ञानसमन्वितेनेत्यर्थः, तपसा तपश्चर्यया अपि च अन्यच्च शुद्धा चासौ भक्तिः शुद्ध भक्तिः तया निष्कामभक्तया सुकृतेन पूर्वपुण्येन उपलभ्यां प्राप्यां साधुपदवीं साधोः श्रेष्ठ सरणिं सम्प्राप्य सम्यग् लब्ध्वा, व्यास सूनुरिव शुकदेव इव योगपदं योगस्य महनीयं स्थान मधिरूढ मास्थितं यतीनां परमहंसानां लोकस्य नाथमधिपं तं प्रकृतं स्वामिवरेण्यं नौमि कीर्तयामि ॥ ४१ ॥

जिसने इस प्रकार अपनी तपस्या, ज्ञान तथा निष्काम भक्ति से प्रचुर पुण्य के द्वारा प्राप्य महातमा की उच्च सरणिको अधिगत किया है, तथा साथ ही श्री शुकदेव जी के सदृश योग के महनीय पद को भी प्राप्त किया, मैं परमहंस जनों के अधिप उस स्वामि वरेण्य की प्रणामाञ्जली के सहित स्तुति करता हूँ ॥ ४१ ॥

ग्रावोच्चयोपचितपर्वतमस्तके वा
गङ्गातरङ्ग हिमसंकुलगोमुखे वा ।
व्याघ्रादि हिंसक समाकुल कानने वा
योगी तपत्यविरतं खलु सोऽद्वितीयम् ॥ ४२ ॥

खलु निश्चयेन स योगी प्रकरणगतः स्वामी ग्राव्णां पाषाणाना मुच्चयः सञ्चयः तेन उपचितो वर्धितश्चासौ पर्वतो नगः तस्य

मस्तके शिखरेवा यद्वा गङ्गाया भागीरथ्या स्तरङ्गै रूर्मिभिः हिमेन तुषारेण च संकुलं व्याप्तं गोमुखं तन्नामकं स्थानं गङ्गाया उत्पत्तिभूः तस्मिन्, अथवा व्याघ्रादयश्च हिंसकाश्च व्याघ्रादि हिंसका जन्तवः तैः समाकुले समाकीर्णे कानने अरण्ये, तत्र सर्वत्रेति वाशब्दस्य समुच्चयोऽर्थः । अविरतं निरन्तर मद्वितीय मभूतपूर्व मिति द्वे क्रिया विशेषणे, तपति तपस्यां करोति ॥४२॥

निश्चय करके श्री स्वामी जी पाषाणपूर्ण पर्वतों के उच्चशिखरों में तथा श्री भागीरथी की तरङ्ग और हिम से आच्छादित गोमुख नाम के श्री गङ्गा जी की उत्पत्ति स्थान में अथवा बाघ, भालू आदि घातुक प्राणियों से युक्त जङ्गल में निरन्तर अश्रुत पूर्व तपस्या कर रहे हैं ॥ ४२ ॥

अद्य प्रपद्य परमां पदवीं यतीनां
स्वामी तपोवनयति र्यतिलोकगीतिः ।
धन्यो भवान् विजयते स्वशुभैश्चरित्रैः
संवीक्ष्य योगिवर मोद मुपैति चेतः ॥ ४३ ॥

अद्य सम्प्रति स्वामी तपोवनयतिः यतीनां योगसाधनवतां परमां पदवीं स्थानं प्रपद्य प्राप्य यतिलोकस्य यतिलोक कर्तृका गीतिर्गानं गुणकीर्तनं यस्य तादृशः सन् धन्यः सुकृती भवान् स्वशुभैः स्वकीयमङ्गलमयैः चरित्रैराचरणै र्विजयते विजयशीलो वर्तते । हे योगिवर ! संवीक्ष्य एतत् सश्रद्धं दृष्ट्वा चेतश्चित्तं मामकीनं मोदं हर्ष मुपैति प्राप्नोति ॥ ४३ ॥

आजकल यह बात प्रसिद्ध है कि श्री स्वामी तपोवन यति योग साधन संपन्न यतिजनों के उच्चपद को प्राप्त कर चुके हैं, और यति

लोगों से कीर्तनीय हुए अपने माङ्गलिक चरित्रों के द्वारा धन्यात्मा आप विजयी बन गये हैं। हे योगीन्द्र ! श्रद्धापूर्व यह देखकर चित्त अतीव प्रफुल्ल होता है; वस्तुतः आप की सौम्यमूर्ति को देखकर सभी जन अपने को कृतार्थ मानते हैं ॥ ४३ ॥

भवादृशै र्योगिवरैः स्वभारतं
प्रभौरतं विश्वतले प्रगीयते ।
प्रशस्यते दिव्य विमान सङ्कुलैः
प्रशस्तवाचा दिवि देवतागणैः ॥ ४४ ॥

विश्वतले संसारे भवादृशै र्भवत्समानै र्योगिवरै र्यति श्रेष्ठैः भवत्समान यतिश्रेष्ठान् निमित्तीकृत्येत्यर्थः, स्वभारतमियं भरत वसुन्धरा प्रभौ परमात्मनि रत मनुरक्त मिति प्रगीयते प्रकर्षेण गीयते, परमात्मचिन्ताप्रधानो धार्मिको देश इति सर्वलोकै रतितरां कीर्त्यत इति भावः। अथ च दिवि अन्तरिक्षे स्वर्गे च दिव्यानि च तानि विमानानि दिव्य विमानानि तैः संकुलैः समन्वितैः तत्र संस्थितैरिति यावत्, देवतागणैः सुरगणैः प्रशस्त-वाचा प्रौढ मनोहरवाणीभिः प्रशस्यते स्तूयते ॥ ४४ ॥

संसार में भारत आप जैसे महात्मा जनों के द्वारा ही अन्य देशों की अपेक्षा अधिकतर आध्यात्मिक, धार्मिक तथा श्रेष्ठ माना जाता है। और भूमण्डल के सब लोग भारत की स्तुति करते हैं। क्योंकि भारत में सब प्रकार के आध्यात्मिक पदार्थ उपलब्ध हैं। आनन्दकन्द सच्चिदानन्द प्रभु की भक्ति और ज्ञान यहां सुलभ है। वस्तुतः यह भारत भूमि आध्यात्मिक कल्पद्रुम ही है। आकाश में और स्वर्ग में देवतागण भी अपने २ विमानों में बैठकर प्रौढ मञ्जुल वाणी से इस भारतवर्ष की स्तुति किया करते हैं ॥ ४४ ॥

दुरितगिरिविनाशे वज्र भृत्तुल्यतेजाः
प्रसृमरकिरणानां ज्योतिषामाकर स्त्वम् ।
अनुभवममृतं तत् पाययित्वा जनानां
रहयसि बहुरूपान् मोह शोकादि रोगान् ॥ ४५ ॥

त्वं भवान् दुरितमेवगिरि दुरितगिरिः कल्मषनगः तस्य विनाशे छेदने वज्रभृता इन्द्रेण तुल्यं समानं तेजः पराक्रमो यस्य स वज्र भृत्तुल्य तेजाः, प्रसृमराः परितो विस्तृताः किरणा रश्मयो येषान्ते प्रसृमर किरणाः तेषां ज्योतिषां विद्यातपोज्ञानादि जनितानां वर्चसा माकरो निधिरसि । अनुभव मनुभवरूपं ब्रह्मज्ञानरूपं तत् प्रसिद्ध ममृतं पीयूषं पाययित्वा पानं कारयित्वा, जनानां लोकानां बहूनि रूपाणि येषान्तान् बहुरूपान् नानाप्रकारान् शोकश्च मोहश्च आदि येषान्ते शोकमोहादयः, शोकमोहादयश्च ते रोगा व्याधयश्च शोकमोहादि रोगाः तान् रहयसि वियोजयसि नाशयसि ॥ ४५ ॥

हे स्वामिन् ! आप पाप रूपी पर्वतों के नाश करने में इन्द्र के तुल्य पराक्रम वाले हो । तथा आप विस्तृत किरण वाले विद्या, तप और ज्ञान आदि के तेजो निधान हैं । और योग से उत्पन्न होने वाले अमृतरूप अनुभव सारी जनता को बता करके आप उनके नाना प्रकार के शोक मोहादि रोगों को नाश भी करते हो ॥ ४५ ॥

हिमगिरिपरिनिष्ठं दुग्द्धमुग्द्धं यशस्ते
निमिष रहित नेत्रैः किन्न देव्यः पिबन्ति ।
यदिह रजतकुम्भं लम्बयन्ते तदर्थं
शशिन मुदित रश्मि किं न कुर्वन्ति मुग्द्धाः ॥ ४६ ॥

देव्यः किन्नरादियोषितः निमिषेण रहितानि निर्निमेषाणि च तानि नेत्राणि नयनानि तै निमिष रहित नेत्रैः, हिमस्यगिरि हिंमगिरिः तस्मिन् परिनिष्ठं परितो व्याप्तं दुग्धवन्मुग्धं मनोहरं दुग्धमुग्धं पयोधवलमित्यर्थः, ते भवतो यशः कीर्तिं किन्न पिबन्ति आस्वादयन्ति, अपितु पिबन्त्येव। इह अत्र हिमाद्रि शिखरेषु तदर्थं यशोऽर्थं यद् रजतस्य कुम्भं रजतकुम्भं रजतघटं लम्बयन्ते अवलम्बन्ते आश्रयन्ते, तस्मिन् तद् भरणाये त्यर्थः, मुग्धा मूढा-स्ता देव्यः संभ्रम्य उदिता उद्गता रश्मयः किरणा यस्य स तमुदित रश्मि सन्निकृष्टोदितं शशिनं चन्द्रं किन्न कुर्वन्ति रजतकलशं किन्न मन्यन्ते, अपितु कुर्वन्त्येव; शशिनि श्वेतकलशभ्रान्ति कुर्वन्तीत्यर्थः। त्वदीयां हिमगिरि शिखरप्रान्त विश्रान्तां विमलां कीर्ति मलौकिकीं तत्रत्य किन्नरादि सीमन्तिनीजना अपि कर्णाभ्यामापीयापीय मत्त-प्रमत्तदशा माटीकन्त इति संक्षेपः। अस्मिन् पद्ये अतिशयोक्ति भ्रान्तिमदादयोऽलङ्कारा ग्राह्याः ॥ ४६ ॥

किन्नरादि नारियां हिमाचल के शिखरों तक फैले हुए आपके स्वच्छ धवल यशोरूप दूध को पलक रहित नेत्रों से क्या नहीं पीती हैं, अर्थात् अतीव उत्कण्ठा से आपके यशो रूप पय का पान करती हैं। किञ्च यहां उस यश को ग्रहण करने के लिये चांदी के घट को ढूंढती हैं, ताकि आपका वह निर्मल यश उस में भर कर रखा जाय, और ये मूढ स्त्रियां समीप में उदित पूर्ण चन्द्रमा को भ्रान्ति से रजत घड़ा मानकर पकड़ने दौड़ती हैं। हिमालय के शिखरों में फैली हुई आपकी विमल दिव्य कीर्ति को उधर रहने वाली किन्नर आदि युवतियां कानों से पी पीकर मत्त प्रमत्त हो रही हैं, यह भाव है। यहां पर अतिशयोक्ति, भ्रान्तिमान् आदि अलङ्कार हैं ॥ ४६ ॥

नियतकरणकार्यः शत्रुषड्वर्गजेता
निगमपथपथीनोऽपी श्वरादेशनेता ।
अधि धरणि विनेता सत्पथानां प्रणेता
जयतु जगति सोऽयं सच्चिदानन्द चेताः ॥ ४७ ॥

नियतं नियन्त्रितं करणाना मिन्द्रियाणां कार्यं विषयग्रहणं येन स नियतकरणकार्यः, शत्रुरूपाणां षण्णां कामक्रोधलोभमोह मदमात्सर्याणां वर्गस्य समूहस्य जेता नियामकः, निगमस्य वेदस्य पन्थाः निगमपथः तस्य पथीनः स्वयमनुगामी, अपि च ईश्वरादेशस्य तदनुशासनस्य नेता प्रापकः निगमानुशिष्ट कार्येषु परप्रापक इत्यर्थः, अधिधरणि धरण्यां पृथिव्यां विनेता विनीतिगुणवान् विनीतिगुण शिक्षकश्च, सन्तः पन्थानः तेषां सत्पथानां सन्मार्गाणां प्रणेता विधाता, अधिकारानुरूप मुपसन्नेभ्यः तत्तदुचित शास्त्रीय साधना प्रदर्शक इति यावत् । सच्चिदानन्दे परब्रह्मणि चेतो मनो यस्य स सच्चिदानन्द चेताः स पूर्वोक्तः अयं बुद्धिगतः स्वामी जगति भुवने जयतु विजयताम् ॥ ४७ ॥

परब्रह्म में निष्ठित श्री स्वामी जी ने अपनी इन्द्रियों को अपने विषय प्रवृत्ति में नियन्त्रित कर काम क्रोधादि छः शत्रुओं पर विजय प्राप्त करली है । साथ ही वेद मार्ग का स्वयं अनुसरण करते हुए अन्यों से भी उस मार्ग का अनुसरण कराते हैं । पृथ्वी में विनयादि गुणवान् तथा शिक्षक और सब को अपनी अपनी योग्यता के अनुसार शास्त्रीय साधना पर ले जाने वाले हैं । अतएव ऐसे महात्मा सब तरह से लोक में विजयी हो ॥ ४७ ॥

अधिकमथ किमर्थं कथ्यते योगिदेव
भवति हि कथिता ते संपदेतावतैव ।
यदिह यतिसमूहै रर्जनीयाऽनिशं सा
यतिवर विरतिस्ते पादसेवां करोति ॥ ४८ ॥

अथ परञ्च हेयोगिदेव हे योगिनां देव देवतावत् पूज्य ! अधिकं वक्तव्यं त्वद्विषये किमर्थं कथ्यते उच्यते, नास्ति विस्तरेण प्रयोजन मिति भावः । हि यतः ते संपत् गुणसंपत्तिः एतावता इयतैव कथिता भवति । यदिह लोके यतिसमूहैः संन्यासिवर्यैं रर्जनीया प्राप्तव्या विरतिर्या विरक्ति रस्ति, हे यतिवर ! सा अनिशं सततं ते श्रीमतः पादस्य सेवा पादसेवा तां चरण वरिवस्यां करोति विदधाति । वैराग्यं सन्न्यासिनां भूषण भूतः सर्वोत्तमः सर्वसमर्थो गुणः, तदुपरि स्वामिनस्तव पूर्णं स्वामित्व मस्ति, पूर्ण वैराग्यवतः सर्वमप्याध्यात्मिकं श्रेयः करतलगत मिति पृथगधिकतया तद्वर्णनेन किमिति भावः ॥ ४८ ॥

पूज्य योगि श्रेष्ठ ! आप सब प्रकार से जयी हैं । आपके विषय में अधिक क्या वर्णन करना ? इतना ही आपकी महिमा का अनुवाद कर सकता हूँ, जिस विरक्ति के लिये योगी जन सदा उत्कण्ठित रहते हैं, वह विरक्ति हे स्वामिवर्य ! स्वयं आपके चरणों की दासी बनी हुई है । वैराग्य संन्यासियों का सर्वोत्तम सर्व समर्थ गुण है, इसलिये महान् भूषण है । उसके ऊपर आपको पूर्ण स्वातन्त्र्य है । पूर्ण वैराग्यवान् संन्यासी को सब प्रकार के आध्यात्मिक श्रेय हस्तगत होते हैं । अतएव पृथक् उसका अधिक वर्णन करने की आवश्यकता नहीं है, यह भाव है॥ ४८ ॥

जयतु सुजनबन्धुः स्निग्द्धकारुण्य सिन्धु-
र्जयतु सुकृत कर्मा ध्वान्तविध्वंस भानुः ।
जयतु यतिवरेण्यः श्रीतपोऽरण्य योगी
जयतु हिमपदोदक्काशिकोत्सङ्ग लोलः ॥ ४९ ॥

सुजनानां सद्गुणवतां बन्धुः प्रियः, स्निग्द्धं सस्नेहञ्च कारुण्यं स्निग्द्धकारुण्यं निर्मानदया तस्य सिन्धुः सागरः, श्री तपोऽरण्यश्चासौ योगी च श्री तपोऽरण्ययोगी श्री तपोवनयतिः जयतु जयशीलो भवतु । सुकृतं कर्म यस्य सः सुकृतकर्मा पुण्यवान्, ध्वान्तस्य अज्ञानरूपस्यान्धकारस्य विध्वंसे नाशने भानुः सूर्यः स जयतु लोके भासताम् । यतीनां वरेण्यः पूज्यः स जयतु । हिमपदस्य हिमालस्यय उदक्काशिका उत्तरकाशी तस्या उत्सङ्गे क्रोडे लोलः क्रीडासक्तः स्वामी जयतु सर्वोत्कर्षेण विराजताम् ॥ ४९ ॥

आप सतपुरुषों के बन्धु और निर्मान महान् कारुण्य के सिन्धु हैं, ऐसे आप श्री तपोवन यति जयशील रहें। पुण्यात्मा तथा अज्ञानरूपी अन्धकार को दूर करने में आप सूर्य के समान हैं, आप सूर्य के समान ही लोक में सदा तेजस्वी रहें । यतियो में वरिष्ठ आप महान् उत्कर्ष को प्राप्त करें । और हिमालय में स्थित उत्तरकाशी की गोदी में आनन्द पूर्वक खेलने वाले आपकी वार वार जय हो ॥ ४९ ॥

गुरुरिव पुरुषाणां शारदास्यो मनीषी
हर इव जित कामो योगिना मग्रगण्यः ।
सुरमुनिरिव वन्द्यः सन्निबन्धप्रणेता
जयतु जगति सोऽयं श्री तपोऽरण्य योगी ॥ ५० ॥

पुरुषाणां मनुष्याणां मध्ये गुरुरिव बृहस्पतिरिव,, शारदा आस्ये मुखे यस्य स शारदास्यः सिद्ध सरस्वतीको, मनीषी धीमान्, हर इव महादेव इव जितः कामो येन स जितकामः पराजित कामदेवः, सुरमुनि र्देवमुनि र्नारद इव वन्द्यः पूज्यः, सतां शोभनानां निबन्धानां ग्रन्थरत्नानां प्रणेता रचयिता सोऽयं प्रकृत एष श्रीतपोऽरण्य योगी श्री तपोवन स्वामी जगति जयतु ॥ ५० ॥

धीमान् श्री तपोवन स्वामी वस्तुतः मनुष्यों में बृहस्पति के समान हैं। सरस्वती जिन के मुख में खेल करती है, अर्थात् सरस्वती से सिद्ध पुरुष हैं। योगियों के भी योगी कामदेव को जीतने वाले भगवान् शङ्कर की तरह हैं। अथच देव मुनि के समान पूज्य, तथा सुन्दर ग्रन्थों के निर्माता आप भुवन में सदा जयी हो ॥ ५० ॥

यमनियमधृतिज्ञः शान्तिदान्त्यम्बुराशि-
र्भसितसित शरीरो भर्गवद्भूरितेजाः ।
हिमशिखरि विहारी दिव्यदर्शी त्रिदर्शी
जयतु जगति सोऽयं श्री तपोऽरण्य योगी ॥ ५१ ॥

जगति भूमण्डले स प्रकृतः अयं श्री तपोऽरण्ययोगी श्री तपोऽरण्यस्य श्री हिमालयवनस्य योगी योगवित् जयतु। कथम्भूतः सोऽस्ति, यो यमाश्च नियमाश्च योगसूत्र प्रसिद्धाः, धृतिर्धैर्यञ्चेति यमनियम धृतयः ता जानातीति यमनियम धृतिज्ञः, शान्तिर्मनसः दान्तिश्चेन्द्रियाणां तयोरम्बुराशिः समुद्र इव, भर्गवद् भर्गेण तुल्यं शिव सदृशं भसितेन भूत्या सितं श्वेतं शरीरं यस्य स भसितसितशरीरः, तथा भूरि बहु तेजो यस्यसः, हिमशिखरी हिमशैलः तस्मिन् विहारी हिमशैल शिखरेषु भ्रमणशीलः, दिव्य

मलौकिकं पश्यतीति दिव्यदर्शी, त्रीन् कालान् भूत भविष्य वर्तमनान् पश्यतीति त्रिदर्शी, एतादृशः स जयतु इति संबन्धः ॥ ५१ ॥

हिमालय के ये महान् तपस्वी स्वामी संसार में विजयी बनें। जो यमनियमादियों के ज्ञाता और अनुष्ठाता एवं शान्ति, दान्ति आदि के विशाल समुद्र हैं। शिवजी की तरह इनका शरीर भी विभूति से श्वेत बना रहता है तथा उनके सदृश तेज वाले हैं, तत्तुल्य ही हिमाचल के शिखरों में विहार करने वाले तथा सुक्ष्मदर्शी, त्रिकालज्ञ भी हैं ॥ ५१ ॥

भवादृशाः शास्त्ररहस्य विज्ञाः
श्रुतामलाचार सुकर्णधाराः ।
कालेयकाले विरला महात्मन्
दृशोः पथं तत्त्वदृशोऽद्य यान्ति ॥ ५२ ॥

महात्मन् हे स्वामिन् ! भवादृशाः त्वादृशाः शास्त्राणा मागमानां रहस्यं तत्त्वं विजानन्ति इति शास्त्र रहस्यविज्ञाः, श्रुताः श्रुतिसम्मता अमलाचाराः शुद्धाचरणानि येषान्ते श्रुतामलाचाराः तेषां सुकर्णधाराः कुशल नाविकाः, कर्णधारस्तु नाविक इत्यमरः, पारयितारः परपारं प्रापयितार इत्यर्थः, तत्त्वं पश्यन्तीति तत्त्वदृशः अद्य इदानीं कालेये कलिसंबन्धिनि काले समये नत्वपरयुगे, विरला सङ्ख्यया अत्यल्पा दृशो नेत्रयोः पथं मार्गं यान्ति व्रजन्ति, दृष्टिगोचरा भवन्ति ॥ ५२ ॥

हे स्वामिन् आज कल कलिकाल में आप जैसे शास्त्र वेत्ता, वास्तविक तत्त्व के वेत्ता, शुद्धाचरण के आचारी, अपने आचरण से तथा उपदेश से भी शुद्धाचरण के प्रचारक, तथा सब के उद्धारक अत्यन्तविरले ही दृष्टिगोचर होते हैं ॥ ५२ ॥

अनन्त पुण्योपचये दुरापे
मुमुक्षु मार्गे सुरतिं तवाहो ।
विलोक्य संफुल्लति चित्तमेतद्-
भव्यैर्गुणै र्हृष्यति को न लोके ॥ ५३ ॥

अहो दुरापे दुष्प्रापे अनन्तानि बहूनि पुण्यानि सुकृतानि तेषा मुपचयो यस्य तस्मिन्ननन्त पुण्य सञ्चयप्राप्ये मुमुक्षूणां ब्रह्मपद प्रेप्सूनां मार्गे पथि तव सुरतिं तीव्रं प्रेम विलोक्य एतदिदं मम चित्तं स्वान्तं संफुल्लति विकसति । लोके जगति भव्यैर्दिव्यै र्गुणैः को न हृष्यति प्रसन्नो भवति ? अपितु सर्वे भवन्ति ॥५३॥

आश्चर्य है कि बड़ी कठिनता से तथा अनन्त पुण्यों के उदय होंने से प्राप्त होने वाले मोक्ष मार्ग में आपका प्रेम देख कर मेरा यह चित्त अतीव प्रसन्न हो रहा है । क्योंकि सुन्दर दिव्य गुणों से संसार में कौन आनन्दित नहीं होता है ? सब ही होते हैं ॥ ५३ ॥

घोरां तपः क्लेशततिं विषह्य
चिरं परिश्रम्य निजार्थ सिद्ध्यै ।
जातः कृतार्थो "हिमवद्विभूतिः"
प्रख्यायते सर्वजनै र्महात्मा ॥ ५४ ॥

घोरां भयानकां तपसः तपस्यायाः क्लेशततिं कष्ट संहतिं विषह्य विशेषेण सहित्वा, निजार्थस्य स्वकीय प्रयोजनस्य सिद्धिः प्राप्तिः तस्यै चिरं बहुकालं परिश्रम्य प्रयत्य, कृतार्थो जातः कृतकृत्यः संपन्नो महात्मा महान् ब्रह्माभिन्न आत्मा जीवात्मा यस्य स महात्मा तत्त्व वित् प्रकृतः स्वामी सर्वजनै "र्हिमवद्विभूतिः" हिमाचलस्य विभूति रैश्वर्यं भूषण मिति प्रख्यायते प्रकर्षेण कीर्त्यते ॥५४॥

महात्मन् ! आपने अपनी इष्ट सिद्धि के लिये भयङ्कर तपस्या के क्लेशों को सहन किया है। तथा बहुत काल तक परिश्रम करके कृतार्थ भी होगये हो। अत एव आपको सब लोग "हिमवद्विभूति" अर्थात् हिमालय के ऐश्वर्य यानी भूषण इस नाम से पुकारते हैं ॥ ५४ ॥

करालकाले यति धर्म लोपके
यतीन्द्र वृत्तिं सुरवाक् समुन्नतिम् ।
विलोक्य योगिंस्त्वयि तद्द्वयं परं
मनो मदीयं समरज्यत त्वयि ॥ ५५ ॥

हे योगिन् ! यतीनां योगिनां धर्मो विहितं कर्म तस्य लोपके अपहारके करालो भयानक श्चासौ काल इति तस्मिन् करालकाले त्वयि भवति यतीन्द्राणां श्रेष्ठ योगिनां वृत्तिं वर्तन माचरणं सुरस्य वाक् सुरवाक् संस्कृत वाणी तस्याः समुन्नतिं वृद्धिं, तयो र्द्वयं तद्द्वयं पर मत्यन्तं विलोक्य त्वयि मदीयं मामकीनं मनः समरज्यत संसक्तमभवत् ॥ ५५ ॥

हे स्वामिन् ! इस भयानक कलिकाल में भी जब कि योग धर्म का सर्वथा लोप होना देखा जा रहा है, तो भी आपका योगाचरण तथा संस्कृत वाङ्मय का विस्तार अधिक से अधिक देखकर मेरा मन आपमें अनुरक्त हुआ। अत एव मैं आपके यश का वर्णन करना उचित समझता हूँ, यह भाव है ॥ ५५ ॥

ग्रामेष्वरण्य घनकुञ्ज कुटाश्रये यो
दर्यां गिरे हिमवतश्च गढ प्रदेशे ।
आगत्य भूरितपसा यशसा यतीन्द्रो
दिष्ट्या सुचारु पदवीं समलञ्चकार ॥ ५६ ॥

यो यतीन्द्रः दिष्ट्या भाग्य परिपाकतः गढ प्रदेशे गढवाल प्रान्ते आगत्य तं पुण्यदेशं सम्प्राप्य हिमवतो गिरे हिंमालय पर्वतस्य ग्रामेषु ग्रामस्थानेषु, अरण्यानां वनानां घनानि निबिडानि यानि कुञ्जकुटानि निकुञ्जकुटीराणि तेषामाश्रये स्थाने दर्यां कन्द रायाञ्च भूरि बहु तपसा तपश्चर्यया यशसा तज्जन्यया कीर्त्या च सुचारु पदवीं सुपदं योगिपदं समलञ्चकार सम्यग लङ्कृतवान् ॥५६॥

इस यतिराज ने भाग्यवशसे इस गढ़वाल में आकर पर्वतीय गाँवों में तथा जङ्गल की घनी लतागृहों के आश्रय में और हिमाचल पर्वतराज की एकान्त कन्दराओं में बैठकर अत्यन्त तपस्या की है। अतः उस तपस्या के प्रभावसे आपने योगियों की महोन्नत पदवी को और प्रचुर कीर्ति को भी प्राप्त किया है ॥ ५६ ॥

सत्कर्मभाववशतो हि नराः सदेह
मान्या भवन्ति भुवि सभ्यशिरोमणीनाम् ।
शान्तान्तरः परमकारुणिक स्तपस्वी
संस्तूयतेऽद्य सुजनैः स उदार कीर्तिः ॥ ५७ ॥

हि यतः इह भुवि अस्यां पृथिव्यां नरा मनुष्याः सत्कर्मणां शिष्टकृत्यानां सद् भावस्य च वशतः तदाश्रयेण सभ्यानां सज्जनानां शिरोमणयः सभ्य शिरोमणयः तेषां श्रेष्ठतरपुरुषाणां सदा सततं मान्याः पूज्या भवन्ति । अतोऽद्य सम्प्रति उदारा विशाला कीर्ति र्यस्य स उदार कीर्ति रुदात्तः, शान्तमन्तर मन्तः करणं यस्य स शान्तान्तरः, परमश्चासौ कारुणिकः परमकारुणिकः परमदयालुः तपस्वी तपोनिष्ठः स महात्मा सुजनैः संस्तूयते सत्पुरुषाणां स्तुति विषयो विद्यते ॥ ५७ ॥

यह निश्चित है कि मनुष्य सत्कर्मों के एवं सद् भाव के प्रभाव से ही शिष्ट जनों के द्वारा इस लोक में पूजे जाते हैं। अत एव आज कल परम दयालु शान्तात्मा तपोनिष्ठ कीर्तिमान् यह महात्मा सज्जनों के स्तुति विषय हुए हैं ।। ५७ ।।

योगप्रभावं भवतो निशम्य
दूरादनेके तव दर्शनोत्काः ।
आलोक्य चागत्य भवन्त मत्र
स्वजन्म धन्यं कलयन्त्य भीक्ष्णम् ।। ५८ ।।

भवतो भवदीयं योगस्य ज्ञाननिष्ठा गौरवस्य प्रभावं प्रतापं निशम्य श्रुत्वा तव श्रीमतो दर्शने साक्षात्कारे उत्का उत्कण्ठिता अनेके बहवोऽत्र उत्तरकाश्यां हिमाचले दूराद् दूरदेशादागत्य एत्य भवन्त मालोक्य साक्षाद्दृष्ट्वा च अभीक्ष्णं पुनः पुनः स्वस्य जन्म स्वजन्म तत् स्वजनिंधन्यं कृतार्थं कलयन्ति मन्यन्ते। भवतां दर्शनं कृत्वा सर्वे कृतार्था भवन्तीत्यर्थः ।। ५८ ।।

श्रीमन् ! आपके ज्ञान प्रभाव को सुनकर बहुत से लोग दूर देशों से हिमालय में इस उत्तर काशी में आकर और आपकी इस सौम्य मूर्तिका दर्शन करके अपने को धन्य मानते हैं, वार वार धन्य कहते हैं। वस्तुतः योगी महात्माओं के दर्शनों से कौन सफल नहीं होता है ? क्योंकि महात्मा भगवान का साक्षात् रूप ही हैं ।। ५८ ।।

काले महामोह मये जगत्यां
संन्यास धर्मो हि निराश्रयोऽयम् ।

इत्थं मतिर्मेऽपगता भवन्त-
मध्यत्र मालोक्य तदास्पदं द्राक् ॥ ५६ ॥

जगत्यां महामोहमये महामोहप्रचुरे काले एतस्मिन् समये अयं संन्यासधर्मो योगिधर्मो निराश्रयो हि निर्गत आश्रयो यस्य स निराश्रय आश्रयरहित एव, न कोप्यस्य पालयिताऽस्तीत्यर्थः । इत्थमुक्तप्रकारा मे मम मतिर्या बुद्धिरासीत् सा तदास्पदं तस्य यति धर्मस्य त्याग वैराग्य ज्ञानादिकस्यास्पदं क्रीडास्थानं भवन्त मालोक्य साक्षात्कृत्य द्राग् आशु अपगता दूरीभूताऽस्ति ॥५६॥

मैं समझता था कि इस समय जब कि महा मोहमय जगत है, सब लोग माया के दास बने हैं, तो संन्यास धर्म, यथार्थ संन्यासी होने वाला मनुष्य कोई नहीं होगा। किन्तु उस धर्म के दृढ अनुष्ठाता तत्ववेत्ता आपको देखकर मेरा यह भ्रम शीघ्र ही दूर हो गया है। निश्चय असत के बढ़ने पर भी सतका प्रभाव बलवान् होता है ॥ ५६ ॥

योगि ब्रुवै व्याप्त तमा महीयं
विलक्षणः कोऽपि न दृष्टि मायात् ।
एको भवान् संप्रति राजतेऽस्यां
तपोवनं श्री हिमवद्विभूतिः ॥ ६० ॥

इयं मही पृथ्वी आत्मानं योगिनं ब्रुवन्तीति योगिब्रुवाः तै र्योगिब्रुवैः कुत्सितयोगिभिः व्याप्ततमा अतिशयेन पूरिता वर्तते । परञ्च विलक्षणः तद् विभिन्नः सद्योगी कोऽपि कश्चित् दृष्टिं दर्शन पथं न आयात् न आगच्छत् । सम्प्रति इदानी मस्यां धरण्यां श्रीहिमवतो हिमालयस्य विभूति योगनिष्ठः तपोवनं तन्नामक एको भवान् केवलो राजते द्योतते ॥ ६० ॥

यह पृथ्वी ऐसे योगी लोगों से भरी हुई है जो कि अपने को योगी कहते हैं, किन्तु वे वस्तुतः योगी नहीं हैं । क्योंकि योग के चिह्न उनके ऊपर कोई भी घटते नहीं हैं । यथार्थ सद् योगी कोई भी देखने में नहीं आया । आज कल इस धरणी में तपस्वी साक्षात् हिमाचल की विभूति केवल आप ही ऐसे हैं जोकि सद् योग में निष्ठावान् और योग के स्तंभ हैं ॥ ६० ॥

एतर्हि हा मूढजना अनेके
विधाय काषायिक साधुवेषम् ।
महात्मना मत्र भवादृशानां
सुनाम धामापि च दूषयन्ति ॥ ६१ ॥

हा हन्त ! एतर्हि अस्मिन् कलिकाले अनेके मूढजना अज्ञानिनः काषायिक आसौ साधुवेषः काषायिक साधुवेष स्तं गैरिक वस्त्रादि परमहंस नेपथ्यं विधाय कृत्वा, स्वशरीरं तादृशं सज्जीकृत्येति भावः । अत्र लोके भवादृशानां त्वादृशां महात्मनां तुर्याश्रमवतां सुनाम शोभनं नामधेयं धाम शोभनं स्थान मपि च दूषयन्ति दूषितं कुर्वन्ति ॥ ५१ ॥

खेदके साथ कहना पड़ता है कि आज कल बहुत से लोग काषाय वस्त्र धारी बन करके लोक में आप जैसे महात्मा यति जनों के प्रातः स्मरणीय नाम को, पवित्र स्थान को भी दूषित कर रहे हैं ! क्योंकि ये लोग ज्ञान से साधु नहीं हैं । तुलसी दास जी की उक्ति चरितार्थ होती है । "नारी मुहे घर संपत्ति नाशी, मूँड़ मुड़ाये भये संन्यासी" ॥ ६१ ॥

योगार्थवेत्ता नियमप्रवीणः
सत्यार्थवक्ता परमात्मनिष्ठः ।

भवादृशः कोऽस्ति कलौ सुयोगी
गुणाः सदा तेऽत्र समुल्लसन्तु ॥ ६२ ॥

कलौ कलियुगे योगार्थं योगरहस्यं वेत्तीति योगार्थवेत्ता योग तत्त्व ज्ञाता नियमेषु यतिधर्मानुष्ठानेषु प्रवीणः कुशलः, सत्यार्थं वक्तीति सत्यार्थवक्ता, अथ परमश्चासावात्मा परमात्मा परंब्रह्म तस्मिन् निष्ठा नैरन्तर्येण स्थिति र्यस्य स परमात्मनिष्ठो भवादृशः श्रीमता तुल्यः सुयोगी सुयतिः कोऽस्ति ? न कोऽपीत्यर्थः। अत्र भुवने सदा सदैव ते गुणाः ज्ञान वैराग्य शमदम मैत्री करुणादयः समुल्लसन्तु विलसन्तुतरामिति ॥ ६२ ॥

इस कलियुग में आपके तुल्य, ऐसा कौन अच्छा योगी है, जो कि योगके मर्मका ज्ञाता, यतिधर्मके आचरण में चतुर हो और सत्यार्थ का बोधक तथा परमात्मा में सर्वतः तत्पर है। वस्तुतः ब्रह्मज्ञान के वेत्ता और वक्ता आप हीं हो। अतः आपके ये ज्ञान, वैराग्य, शम, दम आदि सद्गुण इस मर्त्य लोक में सदैव विराजते रहें, अर्थात् सब के मार्ग दर्शक बनें ॥ ६२ ॥

एको भवानिह रसध्वनिरीति भावा–
लङ्कार गुम्फन चमत्कृति मर्मवेत्ता।
तत्त्वानु भूति जनकश्च शमप्रधानं
काव्यं करोति कमनीय मलोकि योगी ॥ ६३ ॥

यो रसाश्च शृङ्गारादयो ध्वनिश्चाभिधामूलको लक्षणामूलकश्च रीतयश्च वैदर्भ्यादयः "पद संघटना रीति रङ्ग संस्थाविशेष वदि" त्येतल्लक्षणलक्षिताः, भावाश्च स्थायि सञ्चारि भावा अलङ्कारा श्च, अनुप्रसादय उपमादयश्च इति रस ध्वनि रीति

वेत्तीति वेत्ता, शम प्रधानं शान्त रसस्य स्थायी भावः शम इति शान्तरस प्रधानं तल्लक्षणञ्चेदमुक्तं "शमो निरीहावस्थायां स्वात्म विश्रामजं सुख" मिति। तत्त्वस्य ब्रह्म तत्त्वस्य या अनुभूतिरनुभवः तस्य जनकं जनयितृ च कमनीयं सुन्दरं काव्यं करोति विदधाति, स भवानेको योगी यति र्न द्वितीयः इह लोके अलोकि दृष्टः, मयेति शेषः ॥ ६३ ॥

आज कल लोक में आपके इतर कौन ऐसा यति है, जोकि रस, ध्वनि और पद संघटना रूप रीति से युक्त, तथा भाव और अलङ्कार एवं गुण, पाक आदियों से गुम्फित चमत्कार पूर्ण काव्य रचना का मर्मज्ञ हो, साथ ही शान्त रस प्रधान, आत्म सुखप्रद, तत्त्व की अनुभूति संबन्धी सुन्दर निबन्धका निर्माण करने वाला भी हो। एवं विध संन्यासी केवल आप ही दृष्टिगोचर हुए ॥ ६३ ॥

मन्ये यतेश्चरितपुस्तक मद्भुतं यद्–
भावीतिवृत्तरचनेऽपि हिमालयस्य।
साहाय्यमेव न करिष्यति किन्तु तत्र
प्रोज्जीवनं त्वपि तदाननु दास्यतीह ॥ ६४ ॥

यतेः प्रकृतयोगिनः चरितस्य वृत्तस्य पुस्तकम् "ईश्वरदर्शन मथवा श्रीतपोवन चरितम्" इत्येतदाख्यो ग्रन्थः अद्भुत माश्चर्य युतं मन्ये अहं जानामि, यत् पुस्तकं हिमालयस्य नगाधिराजस्य भावीतिवृत्तरचने भाविनि उत्तरकालिके इतिवृत्तरचने वृत्तान्त निबन्धनेऽपि साहाय्यं सहायता मेव न करिष्यति विधास्यति। किन्तु तदा तत्र वृत्तरचने, ननु निश्चितं, प्रोज्जीवनं त्वपि प्रकृष्ट मुज्जीवनं पुनर्जीवनसाधनं प्रोज्जीवनं, मृतप्रायस्य इतिवृत्तस्य पुनर्जी

वनोपयोगिनोऽविज्ञाता विज्ञेयाश्च ये मुख्या विषया एतानिति यावत्; तदपि इह दास्यति ॥ ६४ ॥

श्री स्वामी जी से रचित "ईश्वर दर्शन अथवा श्री तपोवन चरित" नामक ग्रन्थ कों मैं अत्यद्भुत समझता हूँ। क्योंकि वह पुस्तक भविष्य में लिखे जाने वाले हिमाचल के चरित्र वर्णन में केवल सहायता ही नहीं करेगी, किन्तु पर्वतराज के मृतप्राय इति वृत्त में उस समय पुनर्जीवन भी देगी। भविष्य में हिमाचल के पुण्यचरित्र लिखने में बहुत निगूढ विज्ञेय विषय उस पुस्तक से लेकर महान लाभ लब्ध कर सकते हैं, यह भाव है ॥ ६४ ॥

हिमाद्रिशृङ्गेषु महावनेषु
भव्यैर्भवद्भिः सततं भ्रमद्भिः ।
तद् भूतिभिः स्वेश्वर दर्शनं तत्
सद्गद्यपद्यै रचितं सुहृद्यम् ॥ ६५ ॥

इदानीं स्वामिरचितेश्वरदर्शनस्य तत्त्वं वर्ण्यते सप्तभिः पद्यैः- सततं निरन्तरं हिमाद्रेर्हिमशैलस्य शृङ्गेषु शिखरेषु महावनेषु महाविपिनेषु भ्रमद्भिः चङ्क्रमणं कुर्वद्भिः, भव्यै र्दिव्यैः, भवद्भिः श्रीमद्भिः, तस्य हिमालयस्य भूतिभि रैश्वर्यैः, सद्गद्यानि सत्पद्यानि च तैः सद्गद्यपद्यैः सुहृद्यं हृदयस्पर्शि तत् पूर्वोक्तं स्वेश्वर दर्शनं स्वकीयमीश्वरदर्शनं रचितं प्रणीतम् ॥ ६५ ॥

महात्मन्! दिव्यशक्तिमान् आपने हिमालय के उच्च शिखरों में और वनों में भ्रमण करके वहां की दिव्य वस्तुओं के अनुभवों के द्वारा ईश्वर दर्शन ग्रन्थ बनाया है। वह ईश्वर दर्शन गद्य तथा पद्य में भी बनाया गया है। साथ ही ऐसी भाषा और विषयों से गुम्फित है कि जो सहसा अति मनोहारी है ॥ ६५ ॥

अज्ञाततीर्थैं र्विविधै र्हिमाद्रे-
रदृष्टपूर्वै रपि भूरिदृश्यैः ।
दृष्टं सुहृष्टं भवदीशदर्शनं
सुसाधु सेव्यं भगवद्विभूतिमत् ॥ ६६ ॥

हिमाद्रे र्विविधै र्नानाप्रकार कैः, अज्ञातानि तीर्थानि तैरज्ञात तीर्थैरविज्ञात पुण्यक्षेत्रैः, अदृष्ट पूर्वैः प्रागनवलोकितैः, भूरि बहूनि दृश्यानि तै र्भू रिदृश्यै रपि, तेषां वर्णनै रित्यर्थः । सुहृष्टं संपुष्टं, तथा भगवतः परमेश्वरस्य विभूतिरस्यास्तीति विभूतिमत् विभूति सौन्दर्य वर्णनयुतं, सुसाधुभिः श्रेष्ठ साधुजनैः सेव्यं सेवनीयं, भवत ईशदर्शन मीश्वरदर्शनं दृष्ट मदर्शि ॥ ६६ ॥

आपके कर कमलों से लिखित ईश्वर दर्शन निबन्ध में हिमालय के नाना विध अज्ञात तीर्थों का तथा पूर्व न देखे गये अनेक दृश्यों का भी वर्णन किया गया है । एतदर्थ वह सारा ही प्रभु की विशेष विभूतियों से भरा पड़ा है । और सुयोग्य साधुजनों के लिये अतीव सेव्य है, एवम्भूत आपका ईश्वर दर्शन है ॥ ६६ ॥

पदे पदे तत्र रसोन्नताऽऽकृतिः
सुरीतिरम्या सगुणा स्वलंकृतिः ।
सुमञ्जु काव्यं भवदीशदर्शनं
ह्यवेक्ष्य हृत् कस्य न हृष्यति ध्रुवम् ॥ ६७ ॥

तत्र ईश्वरदर्शने ग्रन्थे पदे पदे स्थाने स्थाने रसैरद्भुतादि भिरुन्नता उद्रिक्ता, सुरीतिरम्या शोभनरीतिभिश्च लाटी वैदर्भी प्रभृतिभी रम्या रमणीया, सगुणा प्रसादमाधुर्यादिगुणसहिता,

स्वलंकृतिः शोभनालङ्कारान्विता, आकृतिः तत्स्वरूपं दृश्यते । भवदीशदर्शन मीश्वरदर्शन मीदृशं सुमञ्जु सर्वाङ्ग सुन्दरं काव्य मवेक्ष्य अधीत्य कस्य सहृदयस्यहृत् हृदयं ध्रुवं निश्चयेन न हृष्यति हि, आनन्दितं न भवति, अपितु सर्वेषामेव भवति। निपातो विद्वत्प्रसिद्धि गमकः ।। ६७ ।।

स्वामिन् ! आपके ईश्वर दर्शन ग्रन्थ में स्थान २ पर रस की सरिता जैसी बहती देखी गयी है। साथ ही लाटी, वैदर्भी आदि सुन्दर रीतियां एवं प्रसाद, माधुर्य आदि गुणों से युक्त, और अच्छे २ यमकादि शब्दालङ्कार एवं उपमादि अर्थालङ्कारों के द्वारा सुसज्जित है। इस मनोहर काव्य को देखकर तत्क्षण ही किस सहृदय का हृदय प्रफुल्ल नहीं होता है; अर्थात् सब का ही होता है ।। ६७ ।।

ये त्वद्गुणा विपुल शक्ति भृतो यतीन्द्र
कर्माणि यानि यतिबुद्धिविभावितानि ।
सर्वाणि तानि च तवोत्तमतन्निबन्धे
संवीक्ष्य वीक्ष्य भुवि विस्मयमेति सर्वः ।। ६८ ।।

हे यतीन्द्र ! विपुलां बहुलां शक्तिं बिभ्रतीति विपुल शक्तिभृतः, ये पूर्वकथिताः तव गुणा यतिगुणा ज्ञानवैराग्यादयः, यतीनां योगशीलानां बुद्ध्या विभावितानि निरूपितानि यानि कर्माणि कृत्यानि, तानि तथोक्तानि च सर्वाणि सम्पूर्णानि तव उत्तम आसौ तन्निबन्धः तस्मिन्नुत्तमतन्निबन्धे ईश्वरदर्शने संवीक्ष्य वीक्ष्य सम्यक पुनः पुनर्विलोक्य भुवि भुवने सर्वो जनो विस्मय माश्चर्य मेति प्राप्नोति ।। ६८ ।।

महात्मन् ! आपकी अद्‌भुत शक्ति के दर्शक जो आपके गुण हैं, यतिजनोचित आपके जितने कर्म हैं, वे सब के सब आपके इस उत्तम निबन्ध ईश्वर दर्शन में देखे गये हैं। उस गुण गुम्फित दर्शन को देखकर सभी जन विस्मयान्वित होते हैं। आपका ईश्वर दर्शन वस्तुतः गुणाकर ही है ॥ ६८ ॥

जन्माद्यनेकविषयं विषयानुगाभिः
शून्यं कथाभि रनधीन विचारणाढ्यम् ।
कैलास मुख्य पुरु दुर्गम शैल यात्रा-
वैचित्र्य वर्णत युतं जयति प्रशस्तम् ॥ ६६ ॥

जन्मादयो जन्मकर्म गुणादयोऽनेके विषया अभिधेया यस्य तत् जन्माद्यनेक विषयं विषयं लौकिकं लोक साधारणं अनुगच्छन्तीति ताभि र्विषयानुगाभिः कथाभि र्वचोविन्यासैः शून्यं रहितम्, न अधीनेति अनधीना स्वतन्त्रा या विचारणा मननं तया आढ्यमेधमानं, कैलासो मुख्यः प्रधानो येषु ते कैलासमुख्याः पुरुदुर्गमा अतिमात्रदुर्गमा ये शैलाः पर्वताः तेषु कृताया यात्राया वैचित्र्यमद्भुतकरं यद् वृत्तं तस्य वर्णन माख्यानं तेन युतं, प्रशस्त मीश्वरदर्शनं जयति विजयते ॥ ६६ ॥

योगिन् ! आपके ईश्वर दर्शन में बाल्य काल से लेकर जितने भी चरित हैं, अर्थात् आपने कर्म किये हैं वे सब हैं। आपको बालावस्था से ही विरक्ति हो गई थी। वह ईश्वर दर्शन लौकिक कथाओं से तो शून्य है। केवल अध्यात्म विषयों का स्रोत है और स्वतन्त्र विचार धारा से युक्त, एवं अपने जो कैलासादि मुख्य तथा दुर्गम पर्वतों की यात्रा की है, उस यात्रा के वर्णन से भी अति ही विचित्र और दिव्य आपका चरित्र ग्रन्थ है ॥ ६६ ॥

निजं चरित्रं परमं पवित्रकं
शिवं जनानां हितकारि शिक्षकम् ।
अलौकिकं खल्विद मीशदर्शनं
सदर्थ वद् दर्शनसार पूरितम् ॥ ७० ॥

इदमेतद् ईश्वरदर्शनं खलु परम मत्यन्तं पवित्रकं पूतं निजं स्वसंबन्धि यच्चरित्रं तदात्मकं, शिवं कल्याणमयं, जनानां हितं करोतीति हितकारि अभीष्टदं, शिक्षकं शिक्षाप्रदं, सदर्थवत् प्रशस्त नानार्थ भासुरं, दर्शनानां योग वेदान्तादि शास्त्राणां सारेण तत्त्वेन पूरितं पूर्णं मलौकिकं दिव्यञ्च वर्त्तते ॥ ७० ॥

स्वामिन् ! आपका ईश्वर दर्शन निबन्ध आपकी अति पवित्र नाना लीलाओं से भरा है। साथ ही जनता का कल्याण करने वाला और हितकारी शिक्षक है। नाना उपयुक्त विषयों से एवं समस्त दर्शन शास्त्रों की महिमा से युक्त है। अतएव अलौकिक ही है ॥ ७० ॥

त मीश्वरं ये जगतः स्वयं प्रभं
न विश्वसन्तीह जनाः कुबुद्धयः ।
अधीत्य ते चापि तवेश दर्शनं
स्वतोभविष्यन्ति तदेक रागिणः ॥ ७१ ॥

इह अस्मिन् लोके कुत्सिता बुद्धिर्येषान्ते कुबुद्धयः कुमतयो ये जना लोकाः स्वयं प्रभं स्वयं प्रकाशस्वरूपं तं प्रसिद्धं जगतो विश्वस्य ईश्वरं नाथं न विश्वसन्ति तस्मिन् विश्वासं न कुर्वन्ति । ते चापि तादृशा अपि तव ईशदर्शन मधीत्य पठित्वा स्वतः स्वयं तस्मिन्नेव एकः प्रधानो रागो येषान्ते तदेकरागिणः, तस्मिन्

विश्वासेनानुरक्ता भविष्यन्ति। यतो भवदीय दर्शन मनेक युक्तिभि रीश्वरस्य सत्तां महत्ताञ्च साधयतीत्यर्थः ॥ ७१ ॥

इस लोक में जो दुष्ट मति जन, विश्व के कर्ता स्वयं प्रकाश ईश्वर की सत्ता में विश्वास नहीं करते हैं, ऐसे नास्तिक लोग भी आप से विरचित ईश्वर दर्शन को पढ़ करके अपने आप ही उस सच्चिदानन्द प्रभु में विश्वासी और अनुरागी हो जाते हैं। क्योंकि आपके ईश्वर दर्शन में ईश्वर की सत्ता एवं महिमा को भी अनेक युक्तियों से सिद्ध किया है ॥ ७१ ॥

पुरातनानां विशदे यतीनां
पवित्र पुण्योदय गुम्फितानाम्।
मार्गे व्यधत्त स्वपदं महर्षिः
प्रचार माचारवदाचरन् सः ॥ ७२ ॥

आचारेण धर्मस्य आचरणेन तुल्य माचारवत प्रचारं व्यापकता माचरन् विदधत् स महांश्चासावृषि महर्षिः स्वामी पुरातनानां प्राचीनानां पवित्राणि च तानि पुण्यानि पवित्र पुण्यानि पाप स्पर्श रहितानि पुण्यानि तेषा मुदयेन उद्गमेन परिपाकेन गुम्फितानां युक्तानां यतीना माचार्याणां विशदे विमले मार्गे सरण्यां स्वपदं स्वकीयां गतिं व्यधत्त विहितवान्। प्राचीनाचार्य वर्ग पदानुयायी स्वामी ति भावः ॥ ७२ ॥

अपने आचरण के अनुकूल प्रचार का कार्य भी करते हुए इस महर्षि ने वह आचार्य स्थान प्राप्त किया है, जोकि प्राचीन यतियों को अनेक निष्पाप पुण्यों के उदय से प्राप्त हुआ था। वास्तविक इस कलि काल में आप जैसे आचारनिष्ठ और प्रचार में तत्पर योगी होना कठिन है, यह भाव है ॥ ७२ ॥

अध्यात्म विद्या रसशास्त्रलालने
प्रायेण लोके न समान पुंस्थिते ।
ए तादृशः कश्चन तद्ददाप्यते
मुक्ताफलं हस्तिनि कुत्र चिद्यथा ॥ ७३ ॥

लोके आत्मानमधिकृत्य वर्तत इत्यध्यात्मम्, अध्यात्मं या विद्या अध्यात्मविद्या ब्रह्मविद्या च रसशास्त्रञ्च साहित्यं तयोर्लालने प्रीणने, प्रायेण बहुलतया समान एकस्मिन् पुंसि स्थिते तदाश्रिते न दृश्येते। यथा यद्वत् मुक्तायाः फलं मुक्ताफलं मौक्तिकं कुत्रचित् हस्तिनि दुर्लभतया कस्मिंश्चिद् गजे दृश्यते, न तु सर्वेषु गजेषु । तद्वत् तत्तुल्य मेतादृशः उभयलालनतत्परः कश्चन अनेक पुरुषेषु कश्चिद् आप्यते प्राप्यते ॥ ७३ ॥

प्रायशः लोक में यह बात देखी गई है कि वैराग्य प्रधान वेदान्त के साथ रस प्रधान साहित्य का होना नितान्त असंभव है। किन्तु श्री तपोवन योगी योगवेदान्तादि विद्या के साथ रसशास्त्र यानी साहित्य के भी पूर्ण वेत्ता और काव्य कर्ता हैं। अतएव इस तरफ का पुरुष सर्वत्र मिलना दुष्कर है, जैसे मोती वाला हाथी सब स्थानों में नहीं मिलता है, अनेकों में एक होता है। यह सब कुछ श्री स्वामीजी के पास दिव्य विभूति होने के ही हेतु है ॥ ७३ ॥

स्वान्तः सुखायान्यहिताय चैकदा
केनेह साधो कविकर्म साध्यते ।
लोकोत्तरा ते रचनेशदर्शने
द्वेधा स्ववृत्तिं ज्ञपय त्यनेकधा ॥ ७४ ॥

हे साधो स्वामिन् ! इह केन पुरुषेण एकदा एक कालावच्छेदेन, स्वस्यान्तः स्वान्तः स्वान्तः करणं तत्र सुखाय आनन्दाय, अन्येषा मितरेषां हितायोपकाराय च कविकर्म कविकृत्यं काव्यरचना साध्यते क्रियते ? न केनापीत्यर्थः। ईशदर्शने ग्रन्थे तव भवतो लोका दुत्तरा लोकोत्तरा लोकातीता रचना कृतिरनेकधा बहुशः द्वेधा द्विप्रकारकां स्ववृत्ति स्वकीयां प्रवृत्ति पूर्वं निर्दिष्टां ज्ञपयति बोधयति ॥ ७४ ॥

श्रीमन् साधुवर ! आपके इतर किस पुरुष ने इस प्रकार के ग्रन्थों की रचना की है ? जो कि अध्यात्म आनन्द से अपने को भी सुखद हो, और दूसरों को भी उपकारक बने। अतः दिव्य भाव से युक्त ईश्वर दर्शन आपकी रचना अनेक रूप से अपनी दोनों वृत्तियों को, अर्थात् स्वसुख और परहित प्रत्यक्ष बतला रही है ॥ ७४ ॥

तत्त्वं श्रुतीनां परमं निगूढं
बोधाय साक्षादिव दिव्यनेत्रम् ।
यः सौम्यकाशीशनुतिं जगाद
तपोवनं तं सततं स्मरामि ॥ ७५ ॥

यो योगी श्रुतीनां वेदान्तानां निगूढं रहस्यात्मकं परमं श्रेष्ठं तत्त्वं सारं सारभूतं बोधाय ज्ञानाय साक्षात् प्रत्यक्षं दिव्यञ्च नेत्रञ्च दिव्य नेत्रं तदिव तत्तुल्यां सौम्यकाशीशाय उत्तरकाशी विश्वनाथस्य नुतिं स्तुतिं जगाद उवाच, श्री सौम्य काशीशस्तोत्रा-भिधं ग्रन्थं प्रणिनायेत्यर्थः। सततं सर्वदा तमेवम्भूतं तपोवनं स्वामिनं मनसा स्मरामि स्मृतिपथमानयामि ॥ ७५ ॥

स्वामिन् ! उपनिषदों के गुप्त रहस्य को बतलाने वाला वस्तुतः दिव्य नेत्र की तरफ सूक्ष्म बोध कराने वाला उत्तर काशी विश्वनाथ की स्तुति रूप श्री सौम्यकाशीश स्तोत्र नाम का ग्रन्थ भी आपने रचा है। सदैव मैं ऐसे भक्तवर आप की दिव्य मूर्ति का स्मरण करता हूँ ॥ ७५ ॥

गङ्गोत्तरी गोमुखपर्वते यो
माहात्म्य मस्याश्च तपन्नुवाच ।
श्री जह्नु कन्या बदरीशयोश्च
स्तोत्राणि तत्त्वप्रतिबोधकानि ॥ ७६ ॥

यः स्वामी गङ्गोत्तर्यां गोमुखस्य च पर्वते शिलोच्चये तपन् तपस्यां कुर्वन् अस्या गङ्गोत्तर्यांश्च महात्मनो भावः माहात्म्यं प्रभाव मुवाच उक्तवान्, श्री गङ्गोत्तरी क्षेत्र माहात्म्यं श्री गोमुखीयात्रा चेति ग्रन्थद्वय मरीरचत्। तत्त्वं वेदान्त तत्त्वं तस्य प्रतिबोधकानि सम्यग्ज्ञानजनकानि श्री जह्नु कन्या भागीरथी च बदरीशो बदरीनाथश्च तयोश्च श्री जह्नु कन्या बदरीशयोः स्तोत्राणि स्तुतीरुवाच । श्रीगङ्गास्तोत्रं श्री बदरीशस्तोत्र मिति स्तवग्रन्थयोर्द्वयमपि निर्मितवानित्यर्थः ॥ ७६ ॥

गङ्गोत्तरी और गोमुख पर्वत में तपस्या करते हुए आपने उन क्षेत्रों का भी विशद वर्णन किया है, अर्थात् श्री गोमुखी यात्रा, श्री गङ्गोत्तरीक्षेत्र माहात्म्य नामक दो ग्रन्थ बनाये हैं। साथ ही वेदान्त तत्त्व को बतलाने वाले श्री भागीरथी और बद्रीनाथ जी के स्तोत्रों की भी, श्री गङ्गास्तोत्र, श्री बदरीश स्तोत्र नाम से रचना की है ॥ ७६ ॥

अतीन्द्रियज्ञान विभूषितानि
यद् ग्रन्थरत्नानि महोत्तमानि ।

अबोधरूपं तिमिरं हरन्तं
तपोवनं तं सततं नमामि ॥ ७७ ॥

इन्द्रिय मतिक्रान्त मतीन्द्रियं यज्ज्ञानं आत्मादिपदार्थानां ज्ञानं तेन विभूषितानि उल्लसितानि, महान्ति उत्तमानि महोत्तमानि, यद् ग्रन्थरत्नानि यस्य ग्रन्थरत्नानि प्रबन्धतल्ल जाः सन्ति, अबोधरूप मज्ञानस्वरूपं तिमिर मन्धकारं हरन्तं दूरी कुर्वन्तं तं प्रकृतं तपोवनं स्वामिनं सततं शश्वन्नमामि नमस्करोमि । प्रह्वत्वं परापेक्षया स्वापकृष्टत्वं णम धातो रर्थः ॥ ७७ ॥

अलौकिक ज्ञान के देने में सामर्थ्यशाली जिन श्रेष्ठ ग्रन्थों को आप ने रचा है, और जोकि अध्यात्म विद्या के स्रोत माने गये हैं, इस प्रकार के ग्रन्थ निर्माता और अज्ञान रूपी अन्धकार को दूर करने वाले आप योगी को मैं सदैव नमस्कार करता हूँ। दिव्य गुण संपन्न साधु महात्मा दण्डवत् प्रणाम के योग्य है, इस शिष्टाचार को स्वयं आचरण करके आस्तिक शिरोमणि ग्रन्थकार दिखा रहे हैं ॥ ७७ ॥

सरस सरल भाषा भूषितैः सारगर्भै-
र्विबुधजनमनोज्ञै र्भव्यदैर्यः स्वलेखैः ।
लिखति नवनि बन्धान् लोकहेतोरनेकान्
स जयति यति पादः श्री तपोऽरण्ययोगी ॥ ७८ ॥

सारः तत्त्वं गर्भे येषां तैः सारगर्भैः, सरसा शान्तादिरसान्विता सरला सुबोधा भाषा इति कर्मधारय समासः, तया भूषितैर्युक्तैः, विबुधजनानां विदुषां मनोज्ञै र्मनोहरैः, भव्यदैः शिवप्रदैर्विशिष्टैः स्वलेखैः संस्कृत..द भाषामयैर्लेखनैः, लोकहेतोः लोक कल्याणं निमि

त्तो कृत्य अनेकान् नानाविधान् नवांश्च ते निबन्धा स्तान् योलिखति सम्पादयति, स तादृशो यतिपाद: पूज्ययति: श्री तपोऽरण्य योगी जयति विजयते। मालिनीवृत्तम्। तल्लक्षणन्तु वृत्तरत्नाकरे "ननमय ययुतेयं मालिनी भोगिलोकै" रिति ॥ ७८ ॥

जिस महानुभाव पूज्य स्वामी ने लोक कल्याणार्थं तत्त्व गर्भित, तथा सुन्दर सरस और सुबोधवाली संस्कृत आदि भाषाओं में अपने अनेक प्रकार के बहुल वर्णन वाले निबन्धों को लिखा है, जो निबन्ध-रचनायें-विद्वानों के लिये अति प्रिय हैं, यह विशेष है। ऐसे उन रचनाओं के आविष्कर्ता स्वनाम धन्य श्री तपोबन योगी जयशील हो रहे हैं ॥ ७८ ॥

पाण्डित्यमण्डितमतिं तव संविभाव्य
सद् ग्रन्थबन्धन कलां च परां समीक्ष्य।
मोमोत्ति हृत्तव यते: स्तवकं विधातुं
चोत्कण्ठते निजवच: परिशुद्धिहेतुम् ॥ ७९ ॥

तव पण्डितस्य भाव: पाण्डित्यं विद्वत्ता तेन मण्डिता भूषिता मति: तां संविभाव्य विचार्य, परामधिकाञ्च सद् ग्रन्थानां श्रेष्ठ निबन्धानां बन्धनकलां निर्माणकलां समीक्ष्य सम्यगालोच्य, हृत् मम स्वान्तं मोमोत्ति अतिशयेन मोदते प्रसन्नं भवति। निजवचस: स्वकीय वाच: परिशुद्धिर्विशुद्धि: तस्या हेतु: कारणं निजवच: परिशुद्धि हेतुं तव यते: स्तव कंस्तोत्रं विधातुं कर्तुमुत्कण्ठते उत्कलिकां जनयति च। वसन्ततिलकावृत्तम् "उक्ता वसन्त तिलका तभजा जगौग:" इति ॥ ७९ ॥

स्वामिन् ! आप की पाण्डित्य से पूर्ण मति को देखकर और अच्छे ग्रन्थों के निर्माण करने में अतिशय कुशल आप की शक्ति का

विचार करके हमारा मन अत्यन्त प्रसन्न होता है, साथ ही वचोविशुद्धि का ही हेतु यतिराज आपके स्तोत्र निर्माण के लिये उत्कण्ठित भी होता है ॥ ७९ ॥

तपःसुधासेक विवर्धमानो
विभूति संभूषित भूविभूषा ।
अभारतो भारतवर्ष देशो
विराजते सर्वगुणैकधाम ॥ ८० ॥

तप एव सुधा अमृतं तस्य सेकेन सेचनेन विवर्धमानो विशेषेणैधमानः, विभूतिर्भग ऐश्वर्यं तया संभूषिता भूर्विभूति संभूषितभूः तस्या विभूषा शेखरीभूतः, सर्वगुणानां निखिलगुणाना मेकधाम प्रधानं सद्म, प्रभया नानादृश्यगत कान्त्या च रतो युक्तः, भारतवर्ष देशो भरतभूप्रदेशो विराजते विशेषेण शोभतेऽन्येभ्य इति ॥ ८० ॥

भारतवर्ष ही केवल अपनी अलौकिकता से प्रसिद्ध है। क्योंकि यह देश ही एक ऐसा है जोकि सर्व गुण संपन्न और अनेक कान्तिमय दृश्यों से परिपूर्ण है। निश्चय यह अनेक महर्षि आदियों के तप रूपी अमृत के सींचने से बढ़ा हुआ, और सम्पूर्ण रत्नादि राशियों से मण्डित, पृथिवी का भी भूषण है। एतदर्थ ही भारतवर्ष के लिये सभी देश बहुमति देते हैं ॥ ८० ॥

विभाति तद्दक्षिण दिग्विभागे
सा केरला शङ्कर जन्म भूमिः ।
तत्रैव जातो निजमातृमह्या
अनन्यभक्तोऽस्य गुरु प्रभावः ॥ ८१ ॥

तद्दक्षिणदिग्विभागे तस्य भारतवर्षस्य दक्षिणा या दिक् दक्षिणदिक् अवाची तस्या विभागे खण्डे सा सुविदिता शङ्करस्य शङ्कराचार्यस्य जन्मभूमिर्जन्मस्थानं केरला तन्नामकः प्रान्तो विभाति भासते। उरुरधिकः प्रभावः प्रतापो यस्य स उरुप्रभावः, निज-मातृमह्याः स्वजन्मभूम्या अनन्यश्चासौ भक्तश्चेति अनन्यभक्तोऽद्वितीय सेवकोऽयं स्वामिवर्यः तत्रैव केरल प्रान्त एव जात उत्पन्नः ॥ ८१ ॥

स्वनाम धन्य भारतवर्ष की दक्षिण दिशा में भगवान् शङ्कराचार्य की जन्म भूमि केरल प्रसिद्ध है। उसी केरल नामक प्रान्त में महाप्रतापी और अपनी जन्म भूमि के अनन्य सेवक श्री स्वामी तपोवन महाराज का भी जन्म हुआ है ॥ ८१ ॥

षड् वेद गोचन्द्रमितेऽब्दकेऽस्मिन्
मार्गे सिते हन्त हरे स्तिथौ च ।
सोऽयं सुभद्रेऽजनि केरलीये
क्षीराटवी प्रान्तपदे मनोज्ञे ॥ ८२ ॥

हन्तेति हर्षे। सोऽयं प्रकृतो यतिवरः षट् च वेदाश्च गौश्च चन्द्रश्च षड्वेदगोचन्द्राः तैर्मिते एकोनविंशतिशतोर्ध्वषट् चत्वारिं-शत्तमेऽस्मिन्नब्दके विक्रमीये वर्षे मार्गे मार्गशीर्षस्य सिते शुक्ले पक्षे हरे विष्णोः सुभद्रे मङ्गलमये तिथौ एकादश्याश्च श्री भगवद्गीता जन्मदिने केरलीये केरलदेशान्तर्गते मनोज्ञे सुन्दरे क्षीराटवीनामके प्रान्तपदे भूस्थानेऽजनि उत्पन्नोऽभूत् ॥ ८२ ॥

श्री स्वामी जी महाराज केरल देश के अन्तर्गत क्षीराटवी (पालक्काट्) नाम की भूमि में १९४६ विक्रम संवत्सर के मार्ग शीर्ष पक्ष की एकादशी तिथि, श्री भगवद्गीता के जन्म दिन में उत्पन्न हुए थे।

वस्तुतः केरल भूमि ही गुणवती है, क्योंकि पूर्व से ही यह भूमि महापुरुषों को जन्म दे रही है; अतएव रत्नगर्भा है ॥ ८२ ॥

अलंकृता येन तथा स्वजन्मना
स्वकर्मणा चोत्तमकेरलक्षितिः ।
स सूरिराट् स्वामि तपोवनाख्यया
स्व योग कीर्ते विषयोऽत्र सम्प्रति ॥ ८३ ॥

तथा उक्त प्रकारेण येन महापुरुषेण, स्वजन्मना स्वकीय-प्रादुर्भावेन स्वकर्मणा स्वदेशपरिचर्या रूपेण कर्मणा च उत्तमा केरलस्य क्षितिः क्षितितल मलंकृता भूषिता। अत्र लोके सम्प्रति इदानीं स सूरिणांराट् सूरिराट् विद्वच्छ्रेष्ठः स्वामि तपोवन मित्याख्या तया स्वामितपोवनाख्यया तन्नाम्ना स्वयोगस्य स्वकीय संन्यास-निष्ठायाः कीर्ते स्तज्जनित यशसो विषयः स्थानमभूदिति ॥ ८३ ॥

जिस महापुरुष ने अपने जन्म ग्रहण तथा देशपरिचर्या रूप कर्म के द्वारा उस उत्तम केरल प्रदेश को अलंकृत किया था, वही पण्डिताग्रय इस समय यहाँ श्री स्वामी तपोवन नाम से अपनी स्थित प्रज्ञता जन्य कीर्ति के विषय हो रहे हैं ॥ ८३ ॥

एतद् गुणानां गणनाविधानं
धियाऽल्पया वाञ्छति यः कवीन्द्रः ।
हस्तप्लवेनैव परं महाब्धेः
पारं स यातुं व्यवसाय मेति ॥ ८४ ॥

यः कवीन्द्रः कविवरः अल्पया स्तोकया धिया मत्या एतस्य स्वामिनो गुणानां दैवगुणानां गणनायाः सङ्ख्यानस्य विधानं सङ्ख्या करणं वाञ्छति अभिलषति, स हस्तस्य लवः हस्तलवः तेन करमात्र परिमितया तृणादिनिर्मितया नौकया एव महाब्धेः महासमुद्रस्य परं पारमपरतीरं यातुं गन्तुं व्यवसायं व्यापारमेति गच्छति ॥ ८४ ॥

जो कविवर अपनी छोटी बुद्धि के द्वारा इस महान् तपस्वी के दैवगुण संपत्ति की गणना करना चाहता है, वह मानों एक हाथ परिमाण वाली घास की नौका के द्वारा ही महा समुद्र से पार होना चाहता है, अर्थात् इनके इतने शोभन गुण हैं कि उनका क्रमशः वर्णन करना कठिन है ॥ ८४ ॥

आशैशवाच्छिव पदांबुज भक्तिपोतं
बोधेन सज्जमिव यैरधिगम्य सद्यः ।
व्यात्तास्य दुर्विषय भीषणनक्रचक्रः
स्थित्वा भवेऽपि भववारिधिरेष तीर्णः ॥ ८५ ॥

यैः स्वामिभिः सद्यः प्रागेव, आशैशवात्, आङ् मर्यादाभिविध्योः, एतयोराङ् पञ्चम्यन्तेन वा समस्यत इति, बाल्यावस्थात आरभ्येत्यर्थः । शिवस्य महादेवस्य पदाम्बुजयोश्चरणकमलयो भक्तिः सैव पोतः तं प्रवहणं बोधेन ज्ञानेन सज्जमिव सज्जीकृतं दृढीकृत मधिगम्य प्राप्य, भवे संसारे स्थित्वा स्थितिं कृत्वाऽपि व्यात्तानि उद्घाटितानि आस्यानि मुखानि येषां ते व्यत्तास्याः, व्यात्तास्याश्च ते दुर्विषया दुर्व्यसनानि तएव भीषणनक्रा भयानकमकराश्च तेषां चक्रं समुदायो यस्मिन् स व्यात्तास्य दुर्विषय भीषण नक्र चक्रः, एष दृश्यमानो भवएववारिधिर्भववारिधिः समुद्रः तीर्णोऽतारि ॥ ८५ ॥

जिस तपस्वी स्वामी ने प्रथमावस्था में ही भगवान् महेश्वर की उपासना से भक्ति रूपी जहाज को ज्ञान के द्वारा तय्यार किया हुआ पाया है; और संसार में रहते हुए भी मुँह को फैलाये दुर्व्यसन रूपी भयानक मगरमच्छों वाले संसार रूपी सागर को सहसा पार कर दिया है। वही ये स्वामी तपोवन महाराज हैं ॥ ८५ ॥

यमुत्तमं गूढ़तयाऽवलोकितुं
बुधाः प्रयत्नं भुवि तन्वते भृशम् ।
स एव योगिन् भवता महापथो
ह्यहो स्वबाल्ये वयसीह वेदितः ॥ ८६ ॥

इह भुवि बुधाः पण्डिताः गूढ़तया रहस्यत्वहेतो रुत्तमंपरं यं तत्त्व विचारमार्ग मवलोकितुं द्रष्टुं ज्ञातुं भृशमत्यन्तं प्रयत्न मायासं तन्वते विस्तारयन्ति, अहो आश्चर्य, हि निश्चयेन, हे योगिन् यते ! भवता त्वया स्वबाल्ये वयसि निज बाल्यावस्थायां स एव महापथोऽध्यात्म मार्गो वेदितो ज्ञातः ॥ ८६ ॥

जिस तत्त्व विचार मार्ग को जानने के लिये पण्डित लोग अनेक प्रकार से प्रयत्न करते हैं, अर्थात् श्रुति, स्मृति, दर्शन, और पुराण आदियों के अध्ययन द्वारा जानना चाहते हैं, हे योगिन् ! आपने तो वह श्रेष्ठमार्ग अपनी बाल्यावस्था में ही जान लिया था ॥ ८६ ॥

नृजन्म सारं मरणस्य वार्तां
विज्ञाय संस्कार बलात् स्वबाल्ये ।
मृत्युञ्जयस्यानुपमः स भक्तो
नित्य श्चिदात्मेति विवेद चात्र ॥ ८७ ॥

मृत्यु जयतीति मृत्युञ्जयः तस्य शिवस्य अनुपम उपमारहितः स भक्तः शिवपादानुरक्तः, स्वबाल्ये स्वकौमारे, संस्कारबलात् पूर्वकर्मणां, नृणां जन्म नृजन्म मनुष्य जन्म तस्य सारः सारभूतं वस्तु, मनुष्यशरीरे सर्वप्रधानतया कर्तव्योऽर्थ इत्यर्थः, तं मरणस्य च मृत्योर्वार्ता वृत्तं विज्ञाय अवबुध्य, अत्र अस्मिन् संसारे चिदात्मा चैतन्यघन आत्मा एक एव नित्यो ध्वंसाप्रतियोगीति च विवेद ज्ञातवान् ॥ ८७ ॥

भगवान् शिव के अनन्य भक्त श्री स्वामी जी ने पूर्व जन्म के कर्मबल से अपनी प्रथमावस्था में ही मनुष्य जन्म के मुख्य कर्तव्य तथा मृत्यु की कथा को भी जानकर, आत्मा एक ही नित्य अमर है और सब पदार्थ अनित्य है, इस प्रकार भी जाना ॥ ८७ ॥

यश्चण्डवाताभिहताभ्रतुल्यं
विनाशि सौख्यञ्च भवोपपन्नम् ।
आपातरम्यं विषयोपभोगं
विचारयामास विचारणीयम् ॥ ८८ ॥

यः स्वामी चण्डवातेन प्रचण्डवायुना अभिहतेन ताडितेन अभ्रेण मेघेन तुल्यं सदृशं विनाशि विनशनशीलं भवे संसारे उपपन्नं प्राप्तं विषयोपभोगं विषयाणा मुपभोगो यस्य तद् रूपादि विषयग्रहणजन्य मापाततोऽविचारतो रम्यं रमणीय मुपरिश्रान्मनोहरं सौख्य मानन्दञ्च, विचारणीयं यद् विचारयितु योग्यं विचारया मास विचारितवान् । अस्य पूर्व पद्येन योजना कार्या ॥ ८८ ॥

जिस योगी ने प्रचण्डवायु से ताडित मेघ के समान नष्ट होने वाला, संसार में प्राप्त हुआ, विषयों के उपभोग का जो सुख है इसका

तुच्छ समझा है, क्योंकि यह सुख ऊपर से ही सुखदायी मनोहर ज्ञात होता है, अन्ततोगत्वा दुःखदायी ही है। यह विचार शुभ संस्कार से हो सकता है, अन्यथा नहीं ॥ ८८ ॥

विरक्तिभावं परिलक्ष्य बाढं
कुटुम्बिलोकै र्विनिवारितोऽपि ।
जहौ न स स्वारसिकं सुशीलं
दृढव्रताः सत्पुरुषा भवन्ति ॥ ८९ ॥

बाढं दृढं विरक्तेर्भावं विरक्तिभावं विरागत्व मेतादृशं परिलक्ष्य अवलोक्य, कुटुम्बिलोकैर्बन्धुजनैः विनिवारितोऽपि प्रतिषेधितोऽपि स स्वामी स्वारसिकं निसर्ग सिद्धं सुशीलं शोभनं स्वभावं न जहौ न त्यक्तवान्। सन्तः पुरुषाः सत्पुरुषा धीर पुरुषाः दृढं व्रतं येषान्ते दृढव्रता अभङ्गुर व्रतिनो हि भवन्ति विद्यन्त इत्यर्थान्तरन्यासः ॥ ८९ ॥

स्वामी जी के वास्तविक एवं दृढ निर्मल विराग को देखकर, बन्धुजनों ने उनको उस मार्ग से लौटाने के लिये कई एक प्रयत्न किये हैं, किन्तु स्वामी जी ने अपना लक्ष्य नहीं छोड़ा। क्योंकि धीर पुरुष दृढ व्रत वाले होते हैं ॥ ८९ ॥

तत्त्वानुचिन्ताऽथ च तत्त्वनिष्ठा
दुःखापहानेऽस्य मिहैक हेतुः ।
निश्चित्य चैवं परिहृत्य सर्वां
स्वसंपदं योगपथं जगाम ॥ ९० ॥

इह अस्मिल्लोके तत्त्वस्य ब्रह्मणोऽनुचिन्ता तत्त्वानुचिन्ता तत्त्वमनन मथच तत्त्वे निष्ठा नितरां स्थितिः तत्त्वनिष्ठा, दुःखस्य तापत्रयस्य अपहाने दूरीकरणे अयमेव एक हेतु रेक कारण मस्ति, एव मनेन प्रकारेण च निश्चित्य निर्णीय सर्वा मखिलां स्वसंपदं स्वसंपत्तिं परिहृत्य तिरस्कृत्य योगपथं सन्न्यास मार्गं जगाम सोऽव्रजत् ॥ ६० ॥

आध्यात्मिक, आधिभौतिक और आधिदैविक, इन तीन दुःखों से छुटकारा पाने के लिये केवल यह एक ही उपाय है कि ब्रह्मविषयक विचार, और ब्रह्मतत्त्व में निष्ठा का परिशीलन करना। इस प्रकार भी श्री स्वामी जी ने निश्चय करके अपने बन्धु और अपनी सम्पूर्ण सम्पत्ति को छोड़कर संन्यास मार्ग का अनुसरण किया ॥ ६० ॥

पूतं परं यस्य तपोबलेन
क्षात्रं कुलं केरलनाथनायकम् ।
कृतौ कृतार्थौ पितरौ च येन
तुरीयगः सोऽस्ति तपोवनं सुधीः ॥ ६१ ॥

यस्य तपोबलेन तपः शक्त्या केरलनाथं केरलाधिपञ्च नायकं नायकाख्यञ्च केरलनाथनायकं पुरातन केरल शासक संबन्धि क्षता त्राशात् त्रायत इति क्षत्रं क्षत्रं स्येदं क्षात्रं कुलं क्षत्रियवंशः परमधिकं पूतं पवित्रितमभूत् । एतादृशस्य यतिवरस्य तपस्विनो जन्मना तद्वंशः पवित्रितोऽभूदित्यर्थः । येन योगिना पितरौ माता पितरौ च कृतार्थौ कृतकृत्यौ कृतौ सम्पादितौ । एवम्भूतः स तुरीयगः चतुर्थाश्रमसेवी तपोवनं सुधीर्विद्वानस्ति विद्यते ॥ ६१ ॥

जिस तपस्वी के संन्यास ग्रहण से और तपोबल से केरल देश के पुरातन नायक नाम का क्षत्रिय वंश, जिसमें श्री स्वामी जी का जन्म हुआ था, अति पवित्र हो चुका है। साथ ही जिस योगी ने अपने माता पिता सब को चरितार्थ बनाया है। वही संन्यासाश्रमी पण्डितवर श्री स्वामी तपोवन हैं ॥ ६१ ॥

त्यक्त्वा समस्तं रमसे त्वमेको
महोपकारं जगतः करोषि।
योगिं स्त्वदीयः परिवारसंघ–
स्त्वणोरणीयान् महतो महीयान् ॥ ६२ ॥

त्वं भवानेकः केवलो न द्वितीय इति, समस्तं भौतिकधन-जन्योपभोगं त्यक्त्वा विसृज्य रमसे स्वात्मनि रमणं करोषि, जगतो भुवनस्य महोपकार मतीवोपकृतिञ्च करोषि विदधासि। हे योगिन्! त्वदीयः परिवारस्य स्वजनस्य सङ्घः समुदायस्तु अणो रणुतो प्यणीयान् सूक्ष्मातिसूक्ष्मः, महतो महीयान् पृथुलादपि पृथुलतरो-वर्तते। "वसुधैव कुटुम्बक" मिति न्यायेन अणुबृहत्पदार्थाः सर्वेऽपि भवत्कुटुम्बाङ्गभूता इत्यर्थः। यद्वा अणोरणीयान् महतो महीयान् एकोऽद्वितीयः परमात्मैव भवत्परिवार सङ्घ इत्यर्थः ॥ ६२ ॥

स्वामिन्! आप धन संपत्ति, स्वजन आदि सभी वस्तुओं को छोड़ करके केवल एकाकी ही आत्मा में रमण कर रहे हो। संसार का अतीव उपकार भी आप करते हो। अतएव आपका परिवार छोटे से भी छोटा और बड़े से भी बड़ा, जगत के सब पदार्थ हैं। अथवा आपका परिवार साक्षात परब्रह्म ही है ॥ ६२ ॥

आंग्लेयवाचं प्रथमं पठित्वा
ततः स्वदेशीय बुधाग्रगण्यैः ।
पपाठ सम्यग् दृढ यत्नशीलः
साहिय शास्त्रादि निजं सुशास्त्रम् ।। ६३ ।।

दृढः प्रगाढः कक्षबद्धोयत्नः प्रयास इति दृढ यत्नः तस्मिन् शीलः स्वभावो यस्य स दृढयत्नशीलः, स प्रथमं प्राक्, आंग्लेयवाच मांगल भाषां पठित्वा अधीत्य, तत स्तदनन्तरं स्वदेशेभवाः स्वदेशीयाः त एव बुधाः पण्डिताः तेषामग्रगण्यैरग्रेसरैः सम्यक् साव धानतया साहित्यशास्त्रमादि यस्य तत् साहित्यशास्त्रादि साहित्य शास्त्र सहितं व्याकरणन्यायादि निजं भारतवर्षीयं सुशास्त्रं संस्कृतविद्यां पपाठ अधीतवान् ।। ६३ ।।

श्री स्वामी जी ने तो दृढ़यत्नशील बनकर प्रथम अंग्रेजी विद्या का अध्ययन किया। इसके बाद अपने स्वदेश के महान् विद्वानों के द्वारा व्याकरण, साहित्य, न्याय आदि शास्त्रों का भली भान्ति अध्ययन किया है, अर्थात् आप संस्कृत साहित्य आदि शास्त्रों के भी पूर्ण वेत्ता हैं ।। ६३ ।।

न ज्ञायते ज्ञान मलं तु भास्वरं
वेदान्तशास्त्रेण विना महोत्तमम् ।
विचिन्त्य धीमान् क्रमशः प्रबुद्धै–
र्वेदान्तशास्त्राद्यपि सोऽध्यगीष्ट।। ६४ ।।

वेदान्त शास्त्रेण उपनिषद् दर्शनेन विना महदुत्तमं महोत्तमं मोक्षहेतु र्भास्वरं स्वच्छं ज्ञानं बोधस्तु अलं पर्याप्तं न ज्ञायते नाव-

बुध्यते। धीमान् स बुद्धिमान् स्वामी इत्येवं विचिन्त्य विचार्य क्रमशः क्रमेण प्रबुद्धैः श्रोत्रिय ब्रह्मनिष्ठैः वेदान्त शास्त्राद्यपि अध्यगीष्ट अध्यैत ॥ ६४ ॥

वेदान्त शास्त्र के न जानने पर मनुष्य को वह मोक्ष हेतु श्रेष्ठ उज्ज्वल ज्ञान पूर्ण नहीं हो सकता है, इस प्रकार सम्यक् विचार करके स्वामी जी ने महा ब्रह्मनिष्ठ पण्डितों के द्वारा क्रम से वेदान्त और उसके सहायक योगादि शास्त्रों को भी पढ़ा ॥ ६४ ॥

सुयोग सृत्या मतुलां प्रतिष्ठां
गतस्य विज्ञान गभीरतां च ।
सद् ब्रह्मविद्या कुशलस्य लोके
कोऽप्यद्य पुण्याभ्युदय स्तवायम् ॥ ६५ ॥

लोके सुयोगस्य सृतिः सरणिः सुयोगसृतिः तस्यां सर्वोत्तमे संन्यास मार्गे अतुला मनुपमेयां प्रतिष्ठां यशोभूमिं, विज्ञानस्य तात्त्विकस्य विशेष ज्ञानस्य गभीरता गम्भीरत्वं तां च गतस्य प्राप्तस्य, तथा च सद् ब्रह्मणो निर्गुणस्याद्वितीयस्य विद्यायां शास्त्रानुभव-ज्ञानरूपाया मुभयविधायां कुशलस्य दक्षस्य तव अद्येदानीं कोऽपि कश्चिदाश्चर्य करः अयमेष पुण्याना मभ्युदयो महान् परिणामो वर्तते। अगण्यपुण्यपरिपाकेन भवन्त एतादृशा जाता इत्यर्थः ॥६५॥

इस समय संसार में आप अपनी संन्यासनिष्ठा की प्रतिष्ठा से इतने प्रतिष्ठित, और दर्शन शास्त्रों के ज्ञान एवं अनुभव ज्ञान की गुरुता से इतने महान बन गये हो कि आपका कीर्तिगान करना कठिन है। निश्चय आप ब्रह्म वेत्ता के किन्हीं पूर्व पुण्यों का आविर्भाव हुआ है ॥६५॥

प्रसूय पुत्रं बत पारिकाङ्क्षिणं
तपोवनं लोकगुरुं यतीश्वरम् ।
पूता महाभाग्यवती सुपुत्रिणी
क्षीरटवी प्रान्तमही यशस्विनी ॥ ९६ ॥

बत हर्षे । पारिकाङ्क्षिणं तपस्विनं तपः प्रधानचर्यावन्तं, तपस्वी तापसः पारिकाङ्क्षीत्यमरः, यतीश्वरं योगीन्द्रं लोकस्य गुरुं शिक्षकं तपोवनं तदभिधानं पुत्रं सुतं प्रसूय, महती भाग्यवती महाभाग्यवती महैश्वर्यशालिनी, सुपुत्रिणी सुपुत्रवती, यशस्विनी कीर्तिमती, क्षीराटव्याः प्रान्तः प्रदेशः क्षीराटवीप्रान्तः तस्य मही भूमिः, पूता पवित्रा जातेति ॥ ९६ ॥

महा कीर्तिशाली केरल प्रदेश की क्षीराटवी भूमि तपस्वी लोक गुरु श्री स्वामी तपोवन नाम के यतीश्वर को उत्पन्न करके अतीव भाग्यवती और अच्छे पुत्र की जनयित्री हुई है। केरल भूमि में ही ब्रह्मवेत्ता शङ्करावतार श्री स्वामी शङ्कराचार्य जी का भी जन्म हुआ है और दूसरे तपस्वी श्री स्वामी तपोवन हैं ॥ ९६ ॥

धन्यो भवान् धन्यतमा तवाम्बा
धन्या मही साऽपि च यत्र जन्म ।
धन्या तथेयं हिमवत्सुभूमि-
र्यत्रोपविश्याद्य वृतो यतीन्द्रः ॥ ९७ ॥

भवान् ब्रह्मविद्वरो धन्यः कृतार्थः, तव भवतः सुपुत्रवती अम्बा माता अतिशयेन धन्या इति धन्यतमा, यत्र यस्यां जन्म आत्मधारणं साऽपि च मही पृथिवी केरल भूमिः धन्या प्रशंसनीया,

तथा तेन प्रकारेण इयमेषा हिमवतो हिमालयस्य सुभूमिः पुण्यभूमि धन्या कीर्तिमतीजाता, अद्य इदानीं यत्र हिमालये उपविश्य योग चर्यायां स्थित्वा सिद्धार्थः सन् यतीन्द्रो योगिश्रेष्ठो भवान् वृतः स्वीकृतोऽस्ति लोकैः ॥ ६७ ॥

स्वामिन् ! आप ब्रह्मविद्वर धन्य हैं, और आपकी माताजी भी अतिशय धन्य हैं, जिनके द्वारा ऐसा पुत्र रत्न उत्पन्न हुआ है। वह केरल भूमि भी धन्य है, जिसमें आप उत्पन्न हुए हैं। उसी प्रकार यह हिमालय भी प्रशंसनीय है क्योंकि आप इसी में ही योगज्ञानसाधना करके सिद्धार्थ होकर यति जनों में श्रेष्ठ माने गये हो ॥ ६७ ॥

यद्यप्यहो मङ्गल मङ्गलस्त्वं
श्रीमत्सुपुण्येन सदाऽत्र योगिन् ।
उदेतु सन्मङ्गलसंपदुच्चै-
रमङ्गलं द्राग् विलयं प्रयातु ॥ ६८ ॥

अहो इत्याश्चर्ये। यद्यपि त्वं मङ्गलस्य मङ्गलः सुभद्रस्वरूपोऽसि, तथापि हे योगिन् ! अत्रलोके सदा सर्वदैव श्रीमतां स्वामिनां सुपुण्येन अति शयितसुकृतेन उच्चैरुन्नता सतांमङ्गलाना मक्षीणानां श्रेयसां संपत् संपत्तिरुदेतु वृद्धिं प्राप्नुयात्। अमङ्गल मनिष्टं द्राक् शीघ्रं विलयं प्रयातु नश्यतु ॥ ६८ ॥

यद्यपि हे महात्मन् ! आश्चर्यप्रदरूप से आप सब मङ्गलों के भी मङ्गल हैं, तथापि आपके पुण्य प्रभाव से ही यहाँ सदैव अनश्वर श्रेय की सम्पत्ति बढ़ती रहे और अनिष्ट सब शीघ्र ही नष्ट हो जाय ॥ ६८ ॥

काशीपतिः श्री बदरीश्वरश्च
कैलासनाथश्च सुरस्रवन्ती ।
तवायुषः क्षेमकरः सदाऽस्तु
समर्थनां स्वच्छ हृदा करोमि ॥ ९९ ॥

अहं कविः स्वच्छेन निर्मलेन हृदा हृदयेन समर्थनां प्रार्थनां करोमि विदधामि, यत् सदा काशीपतिर्विश्वनाथः, श्रीबदरीश्वरः श्रीमांश्चासौ बदरीश्वरः श्री बदरीनारायणश्च, कैलासनाथः कैलास पतिः, सुरस्रवन्ती सुरनदी भागीरथी च तव भवत आयुषो जीवितस्य क्षेमं करोतीति क्षेमकरः कल्याणकरोऽस्तु भूयादिति । एताः सर्वा देवताः, याः खलु तव प्रेष्ठा स्तत्र तत्रोपासिताश्च तव सततं श्रेयः प्रदा भवन्तु इति भावः ॥ ९९ ॥

स्वामिन् ! मैं अपने निर्मल चित्त से यानी आन्तरिक भाव से प्रार्थना करता हूँ, कि श्री विश्वनाथ और बदरीनाथ, तथा भागीरथी और कैलासपति महेश्वर आपको चिरायु बनावें, और सदैव मङ्गल देवें । स्वामी जी ने इन सब अपने इष्टदेवताओं को उसी उसी स्थान पर निवास करके उपासना की थी; कवि उन सबके प्रति प्रार्थना कर रहे हैं ॥ ९९ ॥

यस्य प्रसादाय कृतिः कृतेयं
श्रद्धा विधेयेन यदर्प्यते च ।
तस्यैव साधोर्मम भक्तिभावो
भृङ्गायता मङ्घ्रि सरोज युग्मे ॥ १०० ॥

इयं कृतिः श्री तपोवनशतक रूपरचना यस्य प्रसादाय प्रसन्नतायै कृता, यद् यस्मै श्रद्धाया विधेयः श्रद्धाविधेयः तेन मया अर्प्यते समर्प्यते च, तस्य साधोः श्री स्वामी तपोवनस्यैव अङ्घ्रिरेव सरोजोऽङ्घ्रिसरोज स्तयो र्युग्मे युगले मम भक्ति भावोऽनुरागः भृङ्गायतां भृङ्गो भ्रमर इवाचरत्विति ॥ १०० ॥

मैंने यह श्री तपोवनशतक की रचना स्वामी जी की प्रसन्नता के लिये की है, और भक्ति भाव से यतिवर को समर्पण कर दी गई है। मेरा यह भक्ति भाव इन महात्मा के चरण कमलों में भ्रमर रूप बनकर सदैव संसक्त रहे अर्थात् लगा ही रहे ॥ १०० ॥

श्रीबालकृष्णकविना गढदेशजेन
भक्त्या मया यतिपते रचितं मनोज्ञम् ।
स्तोत्रं तदेतदमलं तु तपोवनाख्यं
भूयात् सदा जगति भक्त हृदां सुखाय ॥ १०१ ॥

ॐ नमः परमऋषिभ्यो
नमः परमऋषिभ्यः ।

गढदेशजेन टिहरी गढवाल निवासिना श्री बालकृष्ण कविना एतन्नामकेन कविना मया भक्त्या शुद्ध प्रेमभावेन रचितं निर्मितं मनोज्ञं मञ्जुलं तदेतत् प्रकृतमिद ममलं पवित्रं तपोवनाख्यं श्री तपोवनशतकाख्यं यति पतेः श्रीस्वामि तपोवनस्य स्तोत्रं स्तवनन्तु, जगति संसारे सदा सर्वदा भक्तानां भक्तजनानां हृदयानि चेतांसि तेषां सुखाय प्रमोदाय भूयादिति शम् ॥ १०१ ॥

मैं टिहरी गढवाल निवासी श्री बाल कृष्ण भट्ट कवि ने श्रद्धा और भक्ति से स्वामी जी के यशोगान के लिये यह श्री तपोवनशतक

नामक अतीव मनोहर पवित्र स्तोत्र रचा है। संसार में सदैव ही यह स्तुति भक्त जनों के हृदयों को आनन्द देने वाली ही होगी। निश्चय–सत्य भाव से लिखी गई रचना आबाल वृद्धों के चित्त को आकर्षित करने वाली ही होती है ॥ १०१ ॥

शतककारस्य संक्षिप्तपरिचयः ।

कविता कामिनी यस्य गुणालङ्कार भूषिता ।
सरसा सरलाऽदुष्टा सोऽयं बालमहाकविः ॥ १ ॥
जाखौली ग्रामवास्तव्यो भट्टजाति विभूषणम् ।
टिहरी गढदेशीयः सोऽयं बाल महाकविः ॥ २ ॥
वैद्यदैवज्ञवर्यस्य तारादत्तस्य चात्मजः ।
कश्यपान्वय संभूतः सोऽयं बालमहाकविः ॥ ३ ॥
सरला प्रकृतिर्यस्य विमला च शुभाकृतिः ।
सोऽयं विप्रवरः श्रीमान् बालकृष्ण महाकविः ॥ ४ ॥
सम्मेलने कवीनां यः सुवर्णं पदकं पदम् ।
आदरेण च संलेभे सोऽयं बाल महाकविः ॥ ५ ॥
विद्यालयेष्वनेकेषु संस्कृतस्यात्र येन वै ।
प्रधानाचार्य रूपेणाऽऽध्यापिता बहुशास्त्रिणः ॥ ६ ॥
साहित्य धर्मशास्त्रज्ञो शब्द शास्त्रेऽपि पण्डितः ।
सर्व दर्शनवित् सोऽयं बालकृष्ण महाकविः ॥ ७ ॥

अनेक ग्रन्थ निर्माता ज्योतिषागम कोविदः ।
कर्मकाण्डस्य मर्मज्ञो बालकृष्ण महाकविः ॥ ८ ॥

समाप्यते व्याख्येयं सरला संक्षिप्ता पदार्थपरिमिता यद्यपि, तथापि समेषां भावानां प्रकाशार्थे प्रयोजिका तथा लोक हित प्रयोजिका च भविष्यति । यतः

समापि योगिस्तव पादरागत–
स्तापोवनीयं विवृतिः सुपद्यका ।
कथन्न भूयात् परकार्य साधिका
परेशभक्तोत्तम गीति गायिका ॥ १ ॥
खतवाड़े शुभे ग्रामे वसतिर्यस्य लोस्तुजा ।
स एव मध्यमः पुत्रो रुद्रीदत्तस्य शर्मणः ॥ २ ॥

ॐ नमः परमऋषिभ्यो
नमः परमऋषिभ्यः ।
ॐ शान्तिः शान्तिः शान्तिः ॥

ईश्वरदर्शनम् अथवा श्रीतपोवनचरितम्

(खण्डद्वयात्मकम्)

परमपूज्य श्रीतपोवन स्वामिपाद विरचितो

बहुसंस्तुतः सुप्रसिद्धः संस्कृतग्रन्थः ।

The present work in prose and verse is the story of the life and realizations of Sri Swami Tapovanam written in all objectivity by the Swami himself. We had occasion to notice in the columns of our magazine the Swami's *Saumyakasisasthava* and other beautiful works in Sanskrit. The book before us is writen in flawless and charming verse and prose, in a style suited to the dignity of the subject matter.

The Swami is not only a profound scholar in the Sastras and other scriptures but also a practical mystic who has spent several years of contemplation and reflection in the divine solitude of the Himalayas. We dare say all those who are interested in the revival of the divine tongue in the present age will welcome this work both for the elevating matter it contains and the sweet manner in which it is presented.

—*Vedantakesri, Madras.*

The voyage of spirit set forth here makes very impressive reading unburdened by long compounds, free in use of verbs and free of any anxiety for ornamentation.

Sri Swami Tapovanam's Sanskrit prose is refreshing. The book enriches the stock of modern Sanskrit literature.

This "Atma"-katha is not only an auto-biography but a story of the soul in its progress towards Self-realisation.

—*Hindu, Madras.*

His journey accounts of the Himalayas are very charming and full of deep inspiring ideas. The language is simple and beautiful and it is not complicated by the lengthy preplexing Sandhi-Samasa. We request our readers who dislike the intricate and difficult Samasas of Banabhatta to go through this book with a little patience. Wonderful are the Swamiji's pleasant style and high illuminating ideas ! We quote here a shloka as an example of his exalted style :—

"सत्यं ध्येयं ध्येय मन्यन्न नित्यं सत्यं वाच्यं सर्वदाऽन्यन्न वाच्यम् ।
सत्यं कार्यं नित्यमन्यन्न कार्यं भूयादेवं सन्मनोवाग्विचेष्टः ॥ "

No doubt, this book will be welcomed with great respect by all Sanskrit-knowing aspirants who earnestly desire to understand and realise the TRUTH. Swamijis pictures of peaceful look also adorn the book.

—*Udbodhan, Calcutta.*

प्रथमः खण्डः ··· २) रु० द्वितीयः खण्डः ··· ५) रु०

पूज्य श्री तपोवन स्वामिपाद प्रणीत, कुछ अन्य संस्कृत पुस्तकें

श्रीगङ्गोत्तरी क्षेत्र माहात्म्यम्, श्रीगोमुखीयात्रादिसंवलितम्

पूज्य श्रीप्रभुदत्त ब्रह्मचारि कृत, हिन्दी भाषानुवाद के सहित १)

श्री सौम्य काशीशस्तोत्रम्

पण्डित श्री वल्लभराम शर्म कृत, विस्तृत हिन्दी भाषा-व्याख्यान के सहित ... ... ३)

श्री बदरीश स्तोत्रम्

हिन्दी भाषानुवाद के सहित ... ... ॥)

श्री गङ्गास्तोत्रम् ... ... ॥)

श्री गङ्गासहस्रनामस्तोत्रम्

श्रीतपोवनीय गङ्गास्तोत्र संक्षेप सहितम् .... ॥)

श्री तपोवन शतकम्

पण्डित श्रीबालकृष्ण भट्ट शास्त्रि कृतम्; टीकासहितम् ... १)

मिलने का पता :—

P. Krishna Pillai,
P. O. Perambavoor,
T. C. State

प्रथम संस्करण
जून १९५६

दयाल प्रिंटिंग प्रैस,
देहली।